Oriental Thought Series No. 10

विश्वनाथकृतम्

॥ श्रीवाडेश्वर-महाकाव्यम् ॥

अ. द. पुसाळकर
भांडारकर इन्स्टिटयूट, पुणें ४

॥ श्री ॥

॥ विश्वनाथकृतं श्रीवाडेश्वरमहाकाव्यम् ॥

॥ श्रीगणेशाय नमः ॥ श्री विष्णवे नमः ॥ श्री दुर्गायै नमः ॥

श्री वाडेश्वराय नमः ॥

— १ —

ॐ विद्युद्वृन्दपरीतविद्रुमगिरिप्रस्थोपमेयाकृतिं
कृत्वाङ्केऽम्बिकया निपीतमुखया संश्लिष्टशुण्डं मुदा ॥
विघ्नानीकनिवारणं प्रणमतां सद्वारणेशाननं
वन्दे वन्दितमिन्दुमौलितनयं तं तुन्दिलं सुन्दरं ॥ १ ॥

मातस्त्वं कुरु नाम सार्थकमिदं वागीश्वरीति स्वकं
मद्वाचं प्रविनीय सत्वरमपभ्रंशेषु सञ्चारिणीम् ॥
सच्छब्देषु नयेति हंसगमने वागाधिपत्येन मे
काव्ये देहि मतिं च देवि सदये दासाय सर्वेश्वरि ॥ २ ॥

श्रीकृष्ण स्वजनेष्टदाऽपरिमितं नत्वाऽर्थये त्वामिदं
यन्मन्मौढ्यविलेलिहानविशिति व्याळस्फटामण्डले ॥
तार्क्ष्यस्कन्धकृतासनेन भवता स्थानं विधेयं क्षणं
तेनैवाखिलवाङ्मयस्य सपदि स्यां पारगस्तत्वतः ॥ ३ ॥

पुरा रामोन्मुक्तप्रखरविशिखोद्धूतजलधि
प्रकृत्तोर्वी गुर्वी दिवमपि च खर्वी कृतवती ॥
तदन्तर्विख्यातः क्षितिसुरसुरागाररुचिरो
गुहागारग्रामो सलिलनिधितीरे विजयते ॥ ४ ॥

तस्मिन्प्रतिष्ठितसुरे शुभभूर्यगारे
भूदेवरत्ननिकरे श्रितसिन्धुतीरे ॥
सर्वत्र सुन्दरतरे वसुधैकसारे
देवद्विजैः समुपभोग्य महाग्रहारे ॥ ५ ॥

अस्ति प्रशस्ततममन्दिरमध्यवर्ती
पूर्तेष्टदत्तसुकृतैकसुलभ्यभक्तिः ।।
व्यक्तीकृतोरुमहिमाभिनिवेशमूर्ति-
र्वाडेश्वराभिधसुरो जगदीड्यकीर्तिः ।। ६ ।।

आविर्भावस्यानुपूर्व्येण सर्वं
माहात्म्यं तद्देवदेवस्य वच्मि ।।
रामस्याधिक्षेत्रनिष्पादनादि
ग्रामस्यापि श्रीशपादप्रसादात् ।। ७ ।।

स जामदग्न्यो जयति प्रवीरो
रामो मुनिः शस्त्रभृतां वरेण्यः
यं रेणुकासूत महानुभावं
पुराणपुंसोंशकलावतारम् ।। ८ ।।

पितुर्नियोगात्तिथिरुग्रधन्वा
सुशीलसम्पन्न उदारचेतः ।।
आजानुबाहुः पृथुपीवरांसो
विशालवक्षाः कमलायताक्षः ।। ९ ।।

उपासितः पञ्चभिरेव देवैः
साङ्गै रहस्येण तथोपवेदैः
तथापि लोकाननुसृत्य धीमान्
स धर्मविच्छश्वदिमानुपासे ।। १० ।।

सांङगं. धनुर्वेदमशेषतन्त्रं
रहस्यमात्यन्तिकमेकशिष्यः ।।
अवाप्य भर्गात्किल भार्गवोऽसौ
शेषामधीति पितुरेव कृत्स्नां ।। ११ ।।

जगत्त्रयेऽस्मिंस्तपसा कनिष्ठी-
कृते वसिष्ठादिभिरीड्यमानः ।
यशोवितानेन विराजते स्म
शशीव पूर्णो निशि शारदायां ।। १२ ।।

विप्रः पिता क्षत्रियजाऽस्य माता
तस्माद्द्धारोभयमंशमेषः ।।
मात्रंशमुग्रं धनुराततज्यं
यज्ञोपवीतं पितृकं च कण्ठे ।। १३ ।।

ब्रह्मधृगुर्वीपतिहिंसनार्थो
यस्यावतारः खलु यत्तदुर्व्यां ॥
स क्षत्रियप्रक्षययज्ञदीक्षां
गतः पितुर्धेनुहृतेर्मिषेण ॥ १४ ॥

निहत्य सर्वान्क्षितिपान्समन्ता-
त्तच्छोणितोघैरतिवृद्धरोषः ॥
समन्तशब्दोत्तर पञ्चके यः
क्षेत्रे हृदान्पञ्च चकार पूर्णान् ॥ १५ ॥

एकाधिकं विंशतिवारमेवं
निःक्षत्रियामेकचरो विधाय ॥
गोपायति स्माखिलभूतधात्रीं
निशातमुग्रं परशुं दधानः ॥ १६ ॥

ततः कृतार्थो भगवन्भृगूणां
यशःस्करः शान्तमना मनस्वी ॥
ददौ मुनीन्द्राय हि काश्यपाय
वसुन्धरां वारिधिमेखलान्तां ॥ १७ ॥

अथाश्रमे ऽद्रौ निवसन्महेन्द्रे
दध्यौ स विद्वत्तम इत्यहो किं ॥
मया स्वविश्राणितभूमियोगो
विधीयते न्यायपराङ्मुखेन ॥ १८ ॥

न्याय्यः सरिन्नायकगर्भभूमौ
ममाश्रमो ऽन्यत्र न कुत्रचित्कौ ॥
इत्थं विनिश्चित्य मतिं मनीषी
चचाल शैलादतिशैलसारः ॥ १९ ॥

अन्वेषयन्सागरपुण्यभूमिं
भूम्यादितेर्यार्पितसर्वभूमिः ॥
अतीत्य देशान्स बहूनुपागा-
त्कुलाचलं सह्यमसह्यतेजाः ॥ २० ॥

ददर्श गोत्रं तमतीव तुङ्गै-
लसद्विचित्राकृतिधातुरङ्गैः ॥
स रेणुकासूनुरनेकशृङ्गै-
श्चुम्बन्तमभ्रं विहिताभ्रसङ्गैः ॥ २१ ॥

यदेकसानून्नतमर्कवाहाः
क्वचित्समासाद्य भुजङ्गनाहाः ॥
विश्रान्तिमायान्ति कृतावरोहाः
क्षणं खवीथ्युत्पतनात्यसाहाः ॥ २२ ॥

व्रजन्निवोन्मत्तगजैर्व्रजद्भिः
क्षरन्निव प्रस्रवणैः क्वचिच्च ॥
रणन्निवात्यण्डभवै रणद्भि-
र्ज्वलन्निवाग्र्यौषधिभिर्निशायां ॥ २३ ॥

सौदामनीसुन्दरदामधारी
मार्तण्डचण्डांशुविसारहारी ॥
घनाघनौघो घनघोषकारी
वारीणि यस्मिन्विसृजद्विभाति ॥ २४ ॥
(वार्याकिरन्यत्र विभाति नीरी V. 1.)

यस्मिन्नगा बालदलाद्यनेके
यस्मिन्खगा नीलगलाद्यनेके ॥
यस्मिन्मृगा हस्त्यसुलाद्यनेके
यत्रोरगा देहिगिलाद्यनेके ॥ २५ ॥

गन्धर्वविद्याधरसिद्धनार्यो
यत्र स्पृहा संविहिते ऽष्टपुर्यः ॥
ज्योत्स्नीषु दीव्यन्ति मनोज्ञवेशै-
रधित्यकाभूमिषु जीवितेशैः ॥ २६ ॥

अनेकदुर्गं भयकृन्निसर्गं
भृगुप्रचण्डं बहुवृक्षखण्डं ॥
समारुरोहोषसि राम देहो
गिरं मुरारिः प्रसभोद्धृतारिः ॥ २७ ॥

ततः समासाद्य महाबलेशं
स्नातस्तदुत्पन्नसरिद्वरासु ॥
उपास्य चैनं विधिवत्प्रतीतो
विलोकयामास समुद्रमारात् ॥ २८ ॥

स्वंगत्समुत्तुङ्गतरङ्गमालं
महोर्मिसंक्षालितपार्श्वशैलं ॥
अनेकयादोनिकुरं बलोलं
ताराविडम्बिस्फुटफेनजालं ॥ २९ ॥

गम्भीरनादं तमुवाच रामः
स्वरेण मन्द्रेण समुद्र शीघ्रं ॥
प्रवीरजेतापसर प्रकामं
पदं त्वदन्तः प्रचिकीर्षुरस्मि ॥ ३० ॥

इत्युग्रधन्वा समुदीर्य तत्र
प्रतीक्षमाणोपसृतिं पयोधेः ॥
आसाययासीदुदधिस्तुदर्पा-
च्चक्रे न तच्छासनमुज्झितायुः ॥ ३१ ॥

ततः प्रवृद्धप्रलयाग्निरोषः
स्विन्नाङ्गयष्टिः स्फुरिताधरोष्ठः ॥
खेभ्यो वमन्वह्निशिखास्फुलिङ्गां-
श्चुकोप शूलीव युगान्तकाले ॥ ३२ ॥

समुच्छ्वसन्पादहतो यथाहिः
पञ्चाननः सिन्धुरहेलितो वा ॥
निरीक्ष्य दृष्ट्या खरशोणयैनं
जगाद भूयः पुरुषप्रवीरः ॥ ३३ ॥

क्षाराम्बुधे गर्जसि मोच्चकै रे
किं मामजानन्नसि जामदग्न्यं ॥
मया निकृत्ताः समरे समस्ता-
स्त्रिःसप्तकृत्वो नरलोकपालाः ॥ ३४ ॥

किं शोषयेयं खलु सप्तसिन्धू-
न्किं वा सुमेरुं भुवि पातयेयं ॥
कुर्यां महीं वा विपरीतसंस्थां
किं स्फोटयेयं नु विधातुरण्डं ॥ ३५ ॥

पश्यत्विदानीमधमाम्बुधे त्वां
त्वदीश्वरः शुष्कजलं समन्तात् ॥
ताम्यत्तिमिव्याकुलगर्भभूमि
प्रकाशरत्नं विगतप्रयत्नं ॥ ३६ ॥

इत्यद्भुतोक्तिः प्रलयानिलाभं
संक्षुब्धदर्वीकरभोगभीमं ।
प्रचण्डचापेशितमेकबाणं
स सन्दधे सागरशोषणाय॥ ३७ ॥

सन्धीयमाने धनुषि प्रकाण्डे
ब्रह्माणुसंक्षोभ उदुल्बणोऽभूत् ॥
ररास शैलः परुषं गुहास्यै-
स्तत्रास वार्धिर्वसुधा चकम्पे ॥ ३८ ॥

त्रस्तस्ततस्तत्क्षणमम्बुराशि-
र्ब्रह्मण्यदेवोऽयमिति प्रवृद्धः ॥
भूत्वा द्विजः प्राञ्जलिरग्रगोऽस्य
प्राह स्म पाहीति गिरं सुदीनां ॥ ३९ ॥

कोऽसीति पृष्टः प्रभुणा तमूचे
सवेपथुर्नम्रशिरा नितान्तं ॥
स्वामिन्समुद्रोऽस्मि कृतापराधः
शरण्यमेकं शरणागतस्त्वां ॥ ४० ॥

त्वमेक आद्यः पुरुषो मतो मे
जगज्जनिस्थानविनाशहेतुः ॥
शास्ता खलानामसि धर्मगोप्ता
प्रभीतिभेत्ता शरणागतानां ॥ ४१ ॥

ब्रह्मद्रुहस्त्वं नृपतीन्निरीक्ष्य
कुलेऽवतीर्णोऽसि भृगोर्विशाले ॥
तान्शासितुं त्वां कृतकृत्यमद्य
जानामि रामं परिपूर्णकामं ॥ ४२ ॥

भीत्या मरुत्ते पवते जगत्या-
मुदेति भानुः सततं कृशानुः ॥
दहत्यथो किं बहुभाषणेन
तवाज्ञया सर्वजगत्प्रवाहः ॥ ४३ ॥

कर्तुं समर्थोऽसिजगत्समस्त-
मकर्तुमप्येतदतोऽन्यथा वा ॥
कस्ते प्रयत्नोऽम्बुधिशोषणार्थे
बभ्राविभानामिव घातुकस्य ॥ ४४ ॥

जडस्वभावेन मया विवेकि-
न्नुपेक्षिताज्ञा तव यद्विभून्मः ॥
तत्क्षामये त्वां करुणासमुद्रं
जहीहि कोपं शरणं प्रपन्ने ॥ ४५ ॥

इत्थं यथार्थवचनैरभिपूज्य पूज्यं
दत्वाञ्जलिं चरणयोर्वररत्नपूर्णं ।।
तूर्णं प्रसादनपरः परमानुभावं
रत्नाकरः शरणदं शिरसा ननाम ।। ४६ ।।

।। इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
रामसागरसमागमोनाम प्रथमः सर्गः ।।

— २ —

सिन्धुनेत्थं मृदुपदैरभिवर्णितविक्रमः ।।
शरण्यदेवः सुमना मनाग्रुषमुपाहरत् ।। १ ।।

उत्थाप्यानतमम्भोधिं प्राह स्मेषद्धसन्निव ।।
किमिदं साहसं मन्द वन्द्येषु विहितं त्वया ।। २ ।।

नोपेक्षणीया विभवः कदाचिद्भूतिमिच्छता ।।
समूलोन्मूलनं ते हि क्षुब्धाः सद्यः प्रकुर्वते ।। ३ ।।

परीक्षणीयं न विषं हन्ति नो वेति जानता ।।
हन्त्येव पीतमात्रं तत्तथा वीरोवमानितः ।। ४ ।।

कक्षप्रक्षेपणं वह्नेरुद्दीपनकरं परं ।।
संरंभारम्भकं तद्वन्महतामवमाननं ।। ५ ।।

विचार्यं विदुषा कार्यं कार्यं क्वापि कदापि च ।।
अविचारो हि पुरुषः पङ्के गौरिव सीदति ।। ६ ।।

अग्निदः प्रथमं गेहे वारिदस्तदनन्तरं ।।
यस्तद्वदसि पाथोधे संक्षोभ्यानुप्रसादनात् ।। ७ ।।

नागमिष्यो यदि क्षिप्रं शरणार्थी समुद्र मां ।।
तर्ह्येवाशोषयिष्यं त्वां दारुणेनास्त्रवह्निना ।। ८ ।।

विद्युद्वाडवसंकाशः क्रोधो मम दुरासदः ।।
अंकुशेनेव मातङ्गः शरणोक्त्या त्वया वृतः ।। ९ ।।

एष धर्मो हि महतां यत्प्रपन्नानुपालनं ।।
अचेतनैरप्यहयः पाल्यन्ते चन्दनद्रुमैः ।। १० ।।

नम्रतासदृशं नास्ति स्वार्थसिद्धेर्हि कारणं ।।
नगोत्पाटी नदीपूरो नम्रानवति वेतसान् ।। ११ ।।

रक्ष्यस्त्वं वारिधे नूनममोघश्चैष मे शरः ।।
एवं विरोधे सम्प्राप्ते यद्विधेयं श्रृणुष्व तत् ।। १२ ।।

न शोषयाम्यसन्दिग्धं व्येतु ते भयमुद्यतं ।।
पदायोत्सारयामि त्वां मुक्तेष्वाक्रमणावधि ।। १३ ।।

व्यायामात्सह्यमानेन दैर्घ्येणोत्सर सत्वरः ।।
अस्यावरे त्वदुदरे पदं मे ऽभीप्सितं यतः ।। १४ ।।

इषुं च प्रतिमोक्ष्यामि पञ्चषड्योजनानि वा ।।
ब्रह्माण्डादपि बाह्यो मे बाणो गन्तान्यथा यतः ।। १५ ।।

इत्यादिष्टो जगद्धात्रा सिन्धुरानतकन्धरः ।।
विसृष्टः प्रययौ दिष्ट्या नष्टारिष्टः स्वसालयं ।। १६ ।।

समीक्ष्याथ भृगूत्तंसः सन्ध्यासमयमागतं ।।
तथैव निदधे भूमौ चापं संहितसायकं ।। १७ ।।

अथ संशान्तसंरंभः कृतपादावनेजनः ।।
आचान्तः शुचिरासीनः प्रारेभे सान्ध्यकं विधिं ।। १८ ।।

एतस्मिन्नन्तरे चित्रं निर्गम्योपलिकागणः ।।
भूमेरियेष चापस्य गुणमत्तुं महाद्युतेः ।। १९ ।।

स त्रातो ऽम्बुधिना पूर्वं संप्राप्ताप्लवनस्तटे ।।
आनृण्यायोपकारस्य तस्यैतां मतिमास्थितः ।। २० ।।

गुणे ऽत्ते दूरगो नेषुरस्य स्यादिति सामि ताः ।।
गुणमारेभिरे च्छेत्तुमुपलीकास्त्वरान्विताः ।। २१ ।।

सा तु वज्राधिका मौर्वी गुप्ता च ब्रह्मतेजसा ।।
नाणुप्रमाणाप्यभवत्तासां दशनगोचरा ।। २२ ।।

प्रदोषदोषसंवेत्ता रामो ऽथानुष्ठितक्रियः ।।
परामृशन् धनुर्मौर्वीमपश्यदुपलीवृतां ।। २३ ।।

उत्क्षिप्य सशरं चापं निपात्योपलिकास्ततः ।।
तथैव सशरं भूयो निदधे ग्रावमस्तके ।। २४ ।।

अशपच्चोपली रोषान्न वः संस्थितिरश्मसु ।।
यत्रात्स्यथ क्वचन च तत्र वो वदने ऽस्तु मृत् ।। २५ ।।

अथ शापपरीतास्ता भग्नकामाः सुदुःखिताः ।।
समेत्य सागरं मंक्षु शशंसुर्निजचेष्टितं ।। २६ ।।

सिन्धुराश्वासयामास स्वकार्याद्वृजिनं गताः ॥
वदने वारिदानस्य वरेण सततं विभुः ॥ २७ ॥

रामस्तु जातप्रायत्वात्स्वकार्यस्य शिलीमुखः ॥
क्षेपणीयस्तमिस्रायां किमित्यगमयन्निशां ॥ २८ ॥

व्युष्टायामथ यामिन्यां विहितप्रातराग्नि(ह्नि)कः ॥
जगृहे स महाबाहुर्धनुः संहितसायकं ॥ २९ ॥

विचकर्ष ततो रामः कार्मुकस्य प्रसिंजिनीं ॥
संलग्नसागरोत्सारिस्वर्णपुंखशिलीमुखां ॥ ३० ॥

कृतचापपरिष्वंगा योषेवाभिससार सा ॥
कर्णं सखायमिव तं प्रष्टुकामेव वांछितं ॥ ३१ ॥

शुशुभाते बद्धमुष्टी तस्याकृष्टधनोः करौ ॥
पुरःपश्चाद्धन्वगुणौ कर्षन्तौ सव्यदक्षिणौ ॥ ३२ ॥

स चापः सारमूर्वोऽपि ननामातीव तत्क्षणात् ॥
गुणवन्तः शुद्धवंश्या महत्सु प्रणमन्ति हि ॥ ३३ ॥

कोदण्डं मण्डलाकारं दधत्साचीकृताकृतिः ॥
पुरः स्थापितसव्याङ्घ्रिः शुशुभे भार्गवस्तदा ॥ ३४ ॥

मुमुचे मार्गणं रामः शरव्ये लवणाम्बुधौ ॥
पुरेव त्रिपुरारातिः सुसंरब्धः पुरत्रये ॥ ३५ ॥

स ययौ मेघमार्गेण प्रविमुक्तः शिलीमुखः ॥
नादयन् ध्वनिना व्योमगां तथोपदिशोदितां ॥ ३६ ॥

गगने गच्छतस्तस्य पक्षवातप्रवेपिताः ॥
खण्डं खण्डं ययुर्मेघास्तार्क्ष्यस्येव प्रधावतः ॥ ३७ ॥

जाज्वल्यमानो महसा सहसा ससरन्नरं ॥
बबाधे वीक्षतां चक्षुः क्षणमुत्केव वैद्युती ॥ ३८ ॥

तमापतन्तमालोक्य संवर्तशिखिदारुणं ॥
वरुणालयवारीणि व्याकुलानि किलाभवन् ॥ ३९ ॥

स पपात महाबाणो महाबाणोबलोद्धृतः ॥
सरिद्धवे समुद्धूय शम्बराण्यम्बराद्भृशं ॥ ४० ॥

परिस्फुटच्छुक्तिमुक्ताचिता द्यौरिव तारिता ॥
व्यायामिनी दीर्घतमा प्रादुरास वसुन्धरा ॥ ४१ ॥

अस्त्रशक्तिसमुद्भूतपारावारसमुज्झिता ।
क्षरद्वारिमहापूरपूर्णनिम्नप्रदेशिका ॥ ४२ ॥

उच्चानुच्चगिरिप्राया संक्लिन्नसकलस्थला ॥
फेनजुष्टशिलाजालजलजन्तुकुलाकुला ॥ ४३ ॥

अथावरुह्य सह्याद्रेर्वियुक्तमकरालयात् ॥
स्तूयमानः सिद्धगणैः शिष्यवृन्दवृतो मुनिः ॥ ४४ ॥

पूजयित्वा यथान्यायं क्षेत्रं क्षत्रियघातनः ॥
वेलायामनुकूलायां प्रविवेश प्रसन्नहृत् ॥ ४५ ॥

शतयोजनकं दैर्घ्यादायामात्षट्कसंमितं ॥
सह्यसागरमध्यस्थं क्षेत्रं रामस्य विश्रुतं ॥ ४६ ॥

वदन्ति सीमे यस्योभे दक्षिणोत्तरयोः क्रमात् ॥
प्रातः कैरलदेशस्य नदी वैतरणी च या ॥ ४७ ॥

तदेतत्परमं पुण्यं रामस्य सुमहात्मनः ॥
क्षेत्राणामुत्तमं क्षेत्रं क्षाररत्नाकरोदरे ॥ ४८ ॥

नात्रापरांततादोषः कदाचिदपि कुत्रचित् ॥
श्रीरामनिर्मितत्वेन गर्भभूत्वाच्च वारिधेः ॥ ४९ ॥

अत्र पापा निलीयन्ते चीयन्ते पुण्यराशयः ॥
देहद्विषन्तो जीयन्ते नीयन्ते स्वर्मृताः सुरैः ॥ ५० ॥

सर्वतीर्थाश्रयः सिन्धुः सर्वरत्नाकरो यतः ॥
अतस्तद्गर्भसम्भूतं क्षेत्रं पावनपावनं ॥ ५१ ॥

यद्ध्वनिश्रुतिमात्रेण क्षीयन्ते पापपर्वताः ॥
तद्गर्भभूमिमाहात्म्यं वक्तुं कः शक्नुयाद्भुवि ॥ ५२ ॥

तस्मात्पुण्यमिदं क्षेत्रं पावनं भुवि विश्रुतं ॥
रामक्षेत्रमिति ख्यातं यतो रामेण निर्मितं ॥ ५३ ॥

इषुपातात्समुद्भूतमिषुपाताभिधं ततः ॥
कुंकणस्य तलेऽधस्तात्तलकुंकणमित्यतः ॥ ५४ ॥

न चैतत्कुंकणं वाच्यं कदाचिदपि कुत्रचित् ॥
इयं हि पावनी भूमी रामस्याद्भुतकर्मणः ॥ ५५ ॥

कुंकणं तु समुद्दिष्टं सह्यस्याद्रेरुपत्यका ॥
पूर्वभागे मही निंद्या तत्स्थालोकाश्च कौंकणाः ॥ ५६ ॥

यो मोहादथवा द्वेषाद्रामक्षेत्रं नराधमः ॥
मन्येत कुंकणं मूढः स जनः पापभाजनं ॥ ५७ ॥

रामक्षेत्रेषुपाते द्वे शास्त्रदृष्टेऽस्य नामनी ॥
तलकुंकणमित्येतद्वणिग्भिर्विहितं पुरा ॥ ५८ ॥

यदा जनं जनोऽपृच्छद्रामक्षेत्रं क्व तत्तदा ॥
कुंकणस्य तलेऽब्धौ तदित्यवदस्तलकुंकणं ॥ ५९ ॥

तस्मादिदं क्षेत्रमतीव पुण्यं
धन्यं यशस्यं परमं प्रशस्तं ॥
देवद्विजैः सेवितमात्मनोऽर्थे
महात्मना निर्मितमादिपुंसा ॥ ६० ॥

॥ इति श्री वाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ क्षेत्रनिर्माणो नाम द्वितीयः सर्गः ॥

— ३ —

अभिवेदितुं जगदुदन्तमथो-
ऽधिकृतौ निशाचरपतेर्दयितौ ॥
शुकसारणावनुचरौ किल त-
न्महदद्भुतं ददृशतुर्धरणौ ॥ १ ॥

समुपेत्य रावणमतित्वरया
विहितानती जगदतुस्तमिति ॥
शृणु नाथ चित्रमतुलं जलधौ
प्रबभूव यन्न च भविष्यति नो ॥ २ ॥

लवणाब्धिरास ननु सह्यगत-
श्चलतुंगभंगपरिरुग्णतटः ॥
स तु सांप्रतं चरमतोऽपसृतः
परिदृश्यते विपुलवान्तधरः ॥ ३ ॥

महसा जितार्कदहनः सुमहा-
न्पुरुषश्च तत्र युगदीर्घभुजः ॥
परिदृश्यते तमभितुंगमहो
धृतिरावयोर्न हि न विद्म इति ॥ ४ ॥

स बिभर्त्ति घोरपरशुं निशितं
फणिभोगभीममहदिष्वसनं ॥
शरधिं च पूर्णमतिदीप्तशरै-
मृगचर्मचारुकवचं विलसत् ॥ ५ ॥

स पवित्रपाणियुगलोऽक्षगुणी
भसिताङ्कितासितविविक्ततनुः ॥
श्रुतिघोषनिर्जितसमुद्ररव-
स्तपनिर्गमे सलिलवाह इव ॥ ६ ॥

अनुमीयते ननु महापुरुषे
जगदन्यथाकृतिविधावुचिते ॥
सरितां पतेरपसृतिर्महती
दशकण्ठ तत्र पृथुधामवति ॥ ७ ॥

इति दूतवाक्यमवधार्य धिया
दशकन्धरः कथितलक्षणतः ॥
परिनिश्चिकाय तमनन्तबलं
नृपमर्दनः परशुराम इति ॥ ८ ॥

इति शंकितश्च स बभूव भृशं
विमृशन्किमेष सकलाम्बुनिधिं ॥
पुनरेवमेव परिलेप्स्यति चे-
न्निरुपाश्रया मम पुरी भविता ॥ ९ ॥

अमुना च सामबलिना विहितं
यदयं प्रधक्ष्यति जगद्रुषितः ॥
इति तेन सन्धिमभिकर्त्तुमनाः
प्रमना विमानमधिरुह्य ययौ ॥ १० ॥

मुमुदे समुद्रजठरस्थ महीं
स समीक्ष्य कामगमपुष्पगः ॥
प्रविभिन्नशुक्तिमुखमुक्तलस-
द्दलदच्छमौक्तिकचितां परितः ॥ ११ ॥

स ददर्श भानुकिरणग्लपितं
तनुनीरनीचधरणीनिचितं ॥
इतरेतरप्लुतिपरं परित-
श्चलपुच्छचालितकमुद्रगणं ॥ १२ ॥

अधिभूमि विद्रुमलताः पतिता–
श्चरतश्च शंखनिवहान्बहुशः ॥
उपशुष्यदश्मगतफेनमपां
स विलोक्य विस्मयमवाप परं ॥ १३ ॥

मृगयंश्चचार रजनीचरपः
पुरुषं तमद्भुतपराक्रमिणं ॥
ददृशेऽथ भूमिधरमूर्ध्नि महः
स्फुरदब्जिनीरमणराशिविजित् ॥ १४ ॥

अवरुह्य दूरमथ यानवरा–
न्मृदुपादपद्मपरिलंघितभूः ॥
उपसृत्य तत्र विनयेन शनैः
पुरुषं निविष्टममलं ददृशे ॥ १५ ॥

सुविशालशीतलशिलातलस–
द्वृसिकोत्तराजिनकृतासनकं ॥
भसितावगुंठितविशालतनुं
गललंबिताच्छलसदक्षगुणं ॥ १६ ॥

उपनाभिबद्धकरसंपुटकं
प्रणिमीलिताक्षकमलं विमलं ॥
विलसज्जटामुकुटमंडितकं
यतवाचमात्मनि समाधिपरं ॥ १७ ॥

समुपास्य चेतसि मुहूर्तमथो
शिवमेकमुन्मिलितनेत्रयुगं ॥
तमुपानतः शिवसखानुजनिः
शिवभक्तिचिह्नितविशालतनुः ॥ १८ ॥

तदुपाहितासनगतो जगदे
मुनिमाशराधिपतिरीश मम ॥
खलु जन्मकर्म सकलं सफलं
भवदंघ्रिपंकजनिरीक्षणतः ॥ १९ ॥

तव पौरुषस्य गणनाकरणे
प्रभुरस्ति कोऽपि न जगत्त्रितये ॥
धवलीकृतं सुयशसा भुवनं
तपसाधरीकृत इनो भवता ॥ २० ॥

मम बंधुता च भवतार्हति नो
यदुपास्य एक उडुराजधरः ॥
विधियोगतस्तव समागमनं
मुदमातनोति हृदये तदिदं ॥ २१ ॥

किमिदं प्रवृत्तमुदधेरिति मे
कथयस्व विस्मयवते भगवन् ॥
मृदुसंगिरं तमिति वैश्रवसं
समुदाजहार जमदग्निसुतः ॥ २२ ॥

अवनीं निहत्य नृपतीनखिला–
नखिलार्पिता द्विजनुषे यदतः ॥
स्वकृते ऽर्थिता जलनिधिं धरणी
व्यपदिश्य सायकविसर्गमियं ॥ २३ ॥

वद किं प्रयोजनमिहागमने
करवाणि वा हितकरं तव किं ॥
इति वादिनं वरदमाद्यमुनिं
समवीवदन्मुदित आशरपः ॥ २४ ॥

भगवन्सरस्वदुदरे नगरी
ऽकिमस्तके सति लकेति मम ॥
अविलंध्यनीरनिधिदुर्गवृता–
मवजेतुमीश इह को ऽपि न तां ॥ २५ ॥

भवतोज्झितः सलिलराशिरसौ
पुनरेवमेव तदवध्यपि चेत् ॥
प्ररुजन्ति भूतलपथेन पुरा
बलिनो नृपा भृगुपते बत तां ॥ २६ ॥

तदलं तवेयमवनिः क्षितये
प्रविरम्यतामपहृतेरुदधेः ॥
इति मे महापुरुष चित्तशयं
परिपालितुं त्वमसि योग्यतमः ॥ २७ ॥

अथ तं तथेति समुदीर्य गिरं
विससर्ज निर्जररिपुं भृगुजः ॥
स च नाकयानमधिरुह्य ययौ
मुदितः कृताभिलषितः स्वपुरीं ॥ २८ ॥

अथ तत्र यातुनिगृहीतदिति
तनयवैरिदासिकाः ॥
हैहयरिपुमहिमानमुरुं गुरु
हर्षमापुरवधार्य लोकतः ॥ २९ ॥

धरणीसुराधक रराज
समुदयनिधनाय भूतले ॥
भार्गवमुनिसदने भगवान–
वतीर्ण एष पुरुषः पुरातनः ॥ ३० ॥

रजनीचरोप्ययमुदग्र
सुपरुषपराक्रमः खलः ॥
वीक्ष्य जलनिधि समुत्सरणं
शरणं गतस्तमभयाय शंकितः ॥ ३१ ॥

चरमप्रदेशकमियाम
भुवि भगवतो महामुनेः ॥
तस्य विदितवैभवस्य यतः
प्रभवंति तत्र मथितुं न नैर्ऋताः ॥ ३२ ॥

स तु दीनबंधुरभिपन्न
शरणागतदेवबंदिकाः ॥
दुष्टदमनमतिरिष्टगुणः
समुपेक्षिता न हि कृपापयोनिधिः ॥ ३३ ॥

निशि मंत्रमित्थमुपपद्य
रहसि सकलाः समूहितः ॥
सुप्तजननगरोपपथा–
दिषुपातमीयुरतिलाघवान्विताः ॥ ३४ ॥

मुनिना कृताभयविधान–
मुदितमनसः सुरानुगाः ॥
सागरतटपुलिनोपगता
गतविक्लवाः समभिरेमुरिच्छया ॥ ३५ ॥

अथ पंक्तिकंधरकठोर–
वचनरचितांगविक्रियाः ॥
चेरुरमृतपदास देवता
निगृहीतुमस्त्रपगणा इतस्ततः ॥ ३६ ॥

जमदग्निनंदनपदस्थ–
सुरपरिचरीकदंबकं ॥
वीक्ष्य विकटकुटिलभ्रु भृशं
जगृहुः प्रताड्य लगुडैरभीषुभिः ॥ ३७ ॥

उपनह्यमानपरिरुग्ण–
मखभुगभिसारिकाकृतं ॥
हा बत नत हकटेऽतिपटु
श्रवसोः कटु रवमुपाश्रृणोन्मुनिः ॥ ३८ ॥

धनुराततज्यमिषुधिं च
परशुमतितीक्ष्णरोचिषं ॥
बिभ्रदभयकृदुरेककरः
सहसा पपात परितः परंतपः ॥ ३९ ॥

अथ तस्य चापगुणघोष–
निभृतबधिरा ध्वनिग्रहाः ॥
सिंहनिनदपरिरुग्णहृदः
स्थगिता बभूवुरमरारिसैनिकाः ॥ ४० ॥

प्रवरैश्च तेष्वभिबभूव
तुमुलसमरोऽमरंजयैः ॥
प्रासपरशुविशिखप्रमुखै–
रतितीक्ष्णशस्त्रनिचयैर्निशाचरैः ॥ ४१ ॥

युधि भार्गवस्य शरपङ्क्ति–
रिषुधिकररवेषु संतता ॥
मण्डलमिव धनुराददृशे
शरधौ गुणे च सममाहितः करः ॥ ४२ ॥

निहत निपेतुरधिभूमि
गिरय इव कर्तितच्छदाः ॥
छिन्नकरचरणभूमिरुहाः
स्रवदस्रनिर्झरभृतो गुहाननाः ॥ ४३ ॥

विनिपात्य राक्षसबलानि
विहितबलिदानसत्क्रियां ॥
शोणितकृत परिषेकवतीं
समियाज तत्कमलैर्नवक्षितिं ॥ ४४ ॥

दुरुदंतहृत्परिबभूव
रजनिचरनायकं प्रति ।।
भार्गवखरविशिखाग्रशिखा–
परिदग्धकौणपबलस्य कोपि ना ।। ४५ ।।

इति देवताः समभिरक्ष्य
विहितखलशासनो मुनिः ।।
मायिककृतमपराधमुरुं
मनसावधार्य रुषितः प्रतस्थिवान् ।। ४६ ।।

सपुरस्त्रिकूटककुभृतोद्य
परुषतमशस्त्रशक्तितः ।।
प्लावनमखिलखलौघवतो
जलधौ विधास्य उपपाद्यधूलितां ।। ४७ ।।

इति निश्चयं मुनिभटस्य
लयसमयवह्निवर्चसः ।।
स्वीयविविधकृतिभंगभया–
त्समबोधयद्विधिरुपेत्य रावणं ।। ४८ ।।

समये तदा कलयति स्म
मखहरवरस्य सर्वतः ।।
चंडपवनपरिवर्त्तपरिभ्रम–
दर्जुनवज्रविडंबनं पुरी ।। ४९ ।।

रजनीचरेशमुपगृह्य
विधिरधिगतः शनैः शनैः ।।
शांतयितुमृषिवरं रुषितं
शमनं ह्युपक्रमपुरः प्रतेजसां ।। ५० ।।

पदयोर्निपात्य दशकंठ–
मृषिवरमुवाच विश्वसृट् ।।
एषकृतभवदघः शरणं
चरणांबुजद्वयमुपागतस्तव ।। ५१ ।।

न धिया दिदेश भवदंति
गतसुरवधूविनिग्रहं ।।
कर्त्तुमनुचरगणानपि ते
फलमापुरेव विहितं कृतागसः ।। ५२ ।।

इषुपातनाम भवदीय–
पदपरिगतो निशाचरः ।।
भिन्नविकलहृदयोघदिना–
न्द्रुबितेति सत्यनियमं करोत्यसौ ।। ५३ ।।

भवतेऽभयं च कृतमस्य
नतदितरथोचितं यथातः ।।
क्षंतुमुचितमुचितापचिते
वृजिनं जहीहि जगदंतेक क्रुधं ।। ५४ ।।

इति लोकनाथ सरलोक्ति–
शमित हृदयोविदांवरः ।।
धातृचरणविहितप्रणतिः
स्वपदं ययावथ विसृज्य तावुभौ ।। ५५ ।।

अथावितास्ताः सुरबंदिदेवताः
समेत्य रामः स्वपदे यथायथं ।।
आस्थापयामास वराभिवर्द्धिताः
पदाधिकारं परिकल्प्य भागशः ।। ४६ ।।

अस्मिन्पुरग्रामवनव्रजाकराः
पदे भविष्यंत्यचिरेण मामके ।।
तद्देवतावोभिमतार्थसिद्धये
जना भविष्यंति कृतालयाकृतीः ।। ५७ ।।

उदाहरिष्यंति विधाय वोभिधाः ।
काले करिष्यंति च सन्महोत्सवान् ।।
निजालयत्राणविधानतत्परा–
स्तदिष्टकामान्परिपूरयिष्यथ ।। ५८ ।।

भृगुपतिवरदानैरेवमालोभितास्ता–
स्तदतुलमहिमानं वीक्ष्य विश्वातिगं तं ।।
अधिकृतपदभागस्वामिभावेन सर्वाः
प्रसभमुदितचित्ता देवताः काममूषुः ।। ५९ ।।

।। इति श्री वाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ देवतास्थापनो नाम तृतीयः सर्गः ।।

— ४ —

अथान्वियेषाश्रमपुण्यभूमिं
भूमौ निजायां जितसर्वभूमिः ॥
पूर्वाश्रमीभूतमहेन्द्रभूमि–
भूतासमी मानवतां वरेण्यः ॥ १ ॥

सह्याचलाद्योजनतः प्रतीच्यां
प्रतीपपृथ्वीभृदसह्यवीर्यः ॥
तीरे जगत्पावनिकापगायाः
शैलं स्वशैलप्रतिमं ददर्श ॥ २ ॥

मुनिर्महेन्द्राचलतुल्यसत्वो
महेन्द्रसंवर्णितवीरवादः ॥
साम्यान्महेन्द्रस्य महागिरेस्तं
नाम्ना महेन्द्रं विदधे नगेन्द्रं ॥ ३ ॥

तत्रावसत्तापसशेखरोऽसौ
मुनिर्महात्मा मधुसूदनांशः ॥
उपासमानो गिरिशां गुरुं स्वं
भर्गं निसर्गादविमृग्यमार्गं ॥ ४ ॥

सूर्योदयात्प्राक् सततं स्रवन्त्याः
स्नाति स्म योगेऽखिलतीर्थराजे ॥
तीर्थाग्रिरप्यर्थपराङ्मुखोऽपि
प्रजास्थितिप्रार्थनया समर्थः ॥ ५ ॥

न चोपभुङ्क्ते स्म सुरक्षितां क्ष्मां
स्वनिर्मितक्षेत्रनिवासशीलः ॥
यतः स्वविश्राणितवस्तुभोगं
पापाय पर्याप्ततमं वदन्ति ॥ ६ ॥

गुरौ गरीयस्युडुराजचूडे
सदा समाबद्धनितान्तभक्तिः ॥
कदापि तद्दर्शनमन्तरेण
विलंघयामास न वासरं सः ॥ ७ ॥

तस्यैकदा भावमवेक्ष्यमाण-
स्तिरोबभूव त्रिपुरारिरारात् ॥
स्वदर्शनायागतमाकलय्य
सोमः स सोमार्द्धनिबद्धचूडः ॥ ८ ॥

मुनिस्त्वदष्ट्वा गिरिशं विदित्वा
तिरो हितं स्वाभिनिविष्टहेतोः ॥
मार्त्तण्डयस्ताभिमुखं च वीक्ष्य
तुष्टाव भर्गोन्मुखसंगरस्तं ॥ ९ ॥

नमः शुद्धगौराय तस्मै परस्मा-
त्पराय त्रिलोकीश्वराय ॥
कृपासागरायेभचर्माम्बराय
धरानिर्जराधीशमच्छेकराय ॥ १० ॥

धरणीधरराजसुतापतये
वृषराजविराजितसद्गतये ॥
सकलश्रुतिसंविहितस्तुतये
विधिविष्णुकृतानतयेऽस्तु नमः ॥ ११ ॥

प्रपन्नपीडापरिहारकाय
निर्मुक्तनामग्रहनारकाय ॥
स्वभक्तवांछापरिपूरकाय
नमोऽस्तु तस्मै त्रिपुरान्तकाय ॥ १२ ॥

भक्ताकांक्षी सर्वलोकोरुशिक्षा
दीक्षो दक्षः प्रेक्षणीयांघ्रिरीशः ॥
लोकेशानामेकशस्ता पुरस्ता-
दाविर्भूयादादिमध्यान्तहीनः ॥ १३ ॥

मुक्तोत्सप्तोन्तकाले विततकरतरुक्षिप्तनक्षत्रजालः
शूलाग्रोद्भ्रष्टकाष्ठः करटिरतिहठाट्टासहासोऽपि भूयः ॥
दीनानाथानुकम्पी त्वरितदुरितहा कर्मबन्धप्रभेत्ता
संसाराम्भोधिपोतः स नयनविषयो मेऽस्तु शम्भुः प्रसन्नः ॥ १४ ॥

विश्वोद्भवस्थितिविनाशविधौ विभक्तै-
र्मायागुणैः परिगृहीतवपुः परेशः ॥
मृग्याङ्घ्रिरच्युतविरिंचिमुखैर्मखाशै-
राशापटः प्रकटतामटतां पुरो मे ॥ १५ ॥

इति स्तुवत एवास्य शीघ्रतोषो वृषाकपिः ॥
प्रादुरासीददुरेण दुर्दर्शो वाङमनोदशी ॥ १६ ॥

कण्ठेकालः शशधरकलालङ्कृतः शूलपाणिः
प्रालेयोर्वी धरवरसुतालिङ्गिताङ्गः कपर्दी ॥
गोराजस्थः प्रमथमहितः षण्मुखेभास्ययुक्तो
भस्मस्नायी भुजगवलयः सुप्रसन्नाननाब्जः ॥ १७ ॥

बाहुभिर्बाहुभिर्बाढं परिष्वज्य युगायतैः ॥
प्रह्वमाघ्रायमूर्द्धनेनं कृताञ्जलिमथाब्रवीत् ॥ १८ ॥

जाने त्वां जगतामीशं प्रकृतेः पुरुषात्परं ॥
अव्यक्तमेकमभयं ब्रह्मयत्तदनारतं ॥ १९ ॥

विश्वोत्पत्तिस्थितिध्वंसहेतुं मायागुणैस्त्रिभिः ॥
ब्रह्मविष्णुमहेशाख्यं मुख्यं मायापथात्परम् ॥ २० ॥

ब्रह्माण्डकोटयः काद्ये यस्य तिष्ठन्ति भूरिशः ॥
ईदृक्षा लक्षशस्तत्र यथात्रत्वन्मदादयः ॥ २१ ॥

सत्वं पुराणपुरुषो जगद्व्यापी जगन्मयः ॥
मायाजवन्या संच्छन्नस्त्वलक्ष्यश्चर्मचक्षुषां ॥ २२ ॥

सर्वं करोष्यकर्त्तेव पास्यपालकवत्कवे ॥
हंस्यहन्तेव कूटस्थः साक्षीव परिलक्ष्यसे ॥ २३ ॥

मायाविलसितैस्तैस्तैः क्रीडसि स्ववशः स्वतः ॥
ब्रह्माण्डभाण्डान्युत्पाद्य प्रविष्टस्तेष्वनु स्वयम् ॥ २४ ॥

तस्य ते रजसा विस्वं सृजतस्तमसा घ्नतः ॥
सत्वेन त्रायतस्त्रीणि रूपाणि प्राकृतैर्गुणैः ॥ २५ ॥

तेष्वहन्ता समो रुद्रो राजसो द्रुहिणस्तव ॥
मित्रपुत्रावावयोस्त्वं मध्ये मुख्योऽसि सात्त्विकः ॥ २६ ॥

राजस त्वं सात्विकत्वं तामस त्वं च मायिकैः ॥
गुणैरपार्थैरस्माकं तत्त्वादेकस्त्रयो वयम् ॥ २७ ॥

तस्मादहं त्वन्मयोऽस्मि मन्मयस्त्वं च भार्गव ॥
नावयोरन्तरं किञ्चिद्विधेश्च विधिवित्तम ॥ २८ ॥

अभेदेऽपि त्वदीयोऽहं तरङ्गो वारिधेर्यथा ॥
यथा कला चन्द्रमसो यथा ज्वाला विभावसोः ॥ २९ ॥

विश्वक्षेमविधेयस्त्वं धर्मपालः सनातनः ॥
दृष्ट्वा ब्रह्मद्रुहो भूपानवतीर्णोऽसि साम्प्रतम् ॥ ३० ॥

कलया ब्राह्मणकुले रेणुकायां महात्मनः ॥
जमदग्नेरग्निनिभादुत्पन्नोऽस्यग्निसन्निभः ॥ ३१ ॥

क्षत्रमुत्सादितं सर्वं सप्तकृत्वास्त्रिरेकतः ॥
प्रात्रसाच्च कृता भूमिस्त्वया किल कुलेन्दुना ॥ ३२ ॥

क्षेत्रं च निर्मितं सिन्धौ स्वाश्रमप्रतिपत्तये ॥
इदानीमसि विश्रान्तो रक्षायां दीक्षितः क्षितेः ॥ ३३ ॥

पूर्णो जगद्गुरुरपि लोकप्रामाण्यसिद्धये ॥
तात मां भृत्यभावेन भजसे भृगुनन्दन ॥ ३४ ॥

निःश्वासा निगमा यस्य शारदा यस्य चांशजा ॥
तस्य तेऽध्ययनं मत्तो मन्ये मत्कीर्तिकारणम् ॥ ३५ ॥

यथा वार्द्धर्युद्धृतजलो जलदो वार्द्धिवर्षुकः ॥
तथा त्वद्दत्तविभवस्तवैव वरदोऽस्म्यहम् ॥ ३६ ॥

इत्युक्तवन्तं श्रीकण्ठं कण्ठीरवरिपुत्वचा ॥
परीतं परितः क्रान्त्वा नत्वोवाचार्चितो मुनिः ॥ ३७ ॥

संभावयसि मां नाथ नैतच्चित्रं त्वयि प्रभो ॥
देवदेवे जगन्नाथे भृत्यकीर्तिविधायिनि ॥ ३८ ॥

नाथस्त्वं लोकनाथानां सर्वेषां सर्वशक्तिधृक् ॥
अहं तवास्यपातास्मि स्मरशासनशासनात् ॥ ३९ ॥

स्वदेहार्चात्समुत्पाद्य दत्वा चक्रं सुदर्शनं ॥
त्रयाणां रक्षणार्थाय समर्थास्मि समर्थितः ॥ ४० ॥

वरदो वरदानां त्वं वरं मे देहि वांछितं ॥
नाथ मन्निर्मिते क्षेत्रे त्वया स्थातव्यमा लयं ॥ ४१ ॥

महिम्ना महता चैतत्त्रिलोक्यां प्रथय प्रभो ।।
अहं हि पूजितं तत्र द्रक्ष्यामि त्वां त्रिलोचन ।। ४२ ।।

तत्रापि मद्‌गिरेर्मूले सरित्सागरगामिनी ।।
तत्सिंधुसंगमाद्याभ्यां दिशि योजनमात्रतः ।। ४३ ।।

समुद्रतीरे रुचिरं वनं प्रियतमं मम ।।
तत्र त्वां रोचये द्रष्टुं प्रातः स्नातः सरस्वति ।। ४४ ।।

इति संप्रर्थ्य सर्वज्ञं तूष्णींभूते भृगूद्वहे ।।
उवाच भगवाञ्छंभुः सस्मेरमुखपंकजः ।। ४५ ।।

यथा ते तात संकल्पस्तथा सर्वं भविष्यति ।।
स्थास्यन्ति मुनयः क्षेत्रे तव राम यदृच्छया ।। ४६ ।।

स्थापयिष्यन्ति मां तत्र स्वाश्रमेषु समाहिताः ।।
करिष्ये तत्र सांनिध्यमहं देवगणैः सह ।। ४७ ।।

त्वद्वांछितपदे नित्यं प्रदास्ये दर्शनं तव ।।
क्षेत्रं भविष्यति परं पुरग्रामव्रजोज्वलं ।। ४८ ।।

उदारमहिमस्फीतं त्वत्साम्यान्नात्र संशयः ।।
इत्युक्त्वा चंद्रमौलेखाशिखाभूषस्तिरोहितः ।। ४९ ।।

रामोऽपि मुदितः शैलात्कैलासात्स्वगिरिं ययौ ।।
पारावारे कृतस्नानः कल्पेऽपश्यत्पिनाकिनं ।। ५० ।।

मुमुदे मुनिशार्दूलः शार्दूलाजिनवाससं ।।
समासीनं समालोक्य प्रसादसुमुखं सुतं ।। ५१ ।।

पूजयित्वा यथान्यायं स्तुत्वा नत्वा तदाज्ञया ।।
याति स्म स्वगिरिं चैवमकरोत्प्रतिवासरं ।। ५२ ।।

भगवांस्तु महादेवस्तत्स्थाने स्थिरमानसः ।।
उवास रामवात्सल्याद्वरदो भजतां भुवि ।। ५३ ।।

तदेतद्रुचिरं स्थानं पुण्यं चित्रवनं नवं ।।
भगवान् यत्र विश्वात्मा साक्षादीशः सदाशिवः ।। ५४ ।।

यथा गुहायां संलीनं दुर्लभं वस्तु दुर्दृशां ।।
तथात्र दुर्लभो वासस्तस्मान्नाम्ना गुहाभिधं ।। ५५ ।।

अवनितलविशिष्टं हृत्सुविष्टं सुराणां
गिरिशचरणघृष्टं संनिकृष्टं पयोधेः ।
भृगुपतिपदमिष्टं संप्रजुष्टं गुणौघै-
रघविघटनसृष्टं धर्मपुष्टं चकासे ।। ५६ ।।

।। इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ शंभुप्रसादो नाम चतुर्थः सर्गः ।।

— ५ —

ततः कृतार्थो भगवन् भृगूद्वहो
महेश्वराभ्यागमनिर्वृतः कृती ।
महामतिस्तां स्वकृतां महीमलं
चकार नानारचनाभिरादृतः ।। १ ।।

निर्ममे स्वगिरौ तीर्थं बाणगंगेति विश्रुतं ।
वारुणास्त्रप्रणीतेन यद्बाणेन विनिर्मितं ।। २ ।।

यज्जलस्पर्शमात्रेण पापानां प्रलयो महान् ।
तत्र तोयविधिं कृत्स्नं स्वयं चक्रेऽनुवासरं ।। ३ ।।

रामतीर्थाभिधं चान्यन्निर्ममे सुमहत्सरः ।
किंचिद्दूरेण सरितः स्वशैलस्य च दक्षिणे ।। ४ ।।

अमृतत्वं मृतो याति पंकभाक् पंकहीनतां ।
चित्रं यत्र भवांभोधौ निमज्जन्न निमज्जति ।। ५ ।।

आहूय कृत्तिकापुत्रं भगवन्तं षडाननं ।
अस्थापयत्पुराभ्याशे तथाम्बां विन्ध्यवासिनीं ।। ६ ।।

कार्त्तिक्यां कृत्तिकायोगे दृष्टो यः शिवयोगतः ।
सप्तजन्म सुविप्रत्वं धनाढ्यत्वं च यच्छति ।। ७ ।।

नदीं च तां महाभागः स्वमहिम्नाभ्यवर्द्धयत् ।
या जगत्पावनीनाम्नाऽन्वर्थनाम्नी समुद्रगा ।। ८ ।।

ततो दाल्भ्यादयो याता मुनयो रामसंगतौ ।
ते यथारुचि संचक्रुः स्वाश्रमान्मुनिपुंगवाः ।। ९ ।।

स्वाश्रमेषु च पुण्यानि तीर्थान्यरचयंश्च ते ।
पुण्यतीर्थाश्रमैरेवं रामक्षेत्रं सुपप्रथे ॥ १० ॥

तत्र व्याडो नाम मुनिः शंभुदर्शनलालसः ।
विद्वान्गुहावनेवात्सीदाश्रमे रामसंमतः ॥ ११ ॥

स पदे संप्रतिष्ठाप्य शांभवं लिंगमंगवित् ।
निःसंगोंगविमुक्त्यर्थं तपस्तेपे तपोधनः ॥ १२ ॥

अथ रामो महाबुद्धिः कावेरीं सरितं गतः ।
आनेतुं ब्राह्मणान्मुख्यान्निजसंगतये कृती ॥ १३ ॥

तत्रार्या ब्राह्मणा मुख्याः पयोष्णीतीरसंभवाः ।
स गृहप्रोषिताः पुण्याः वेदवेदांगपारगाः ॥ १४ ॥

तानुवाच समेतांस्तैः कृतातिथ्यो महामुनिः ।
सर्वे श्रृणुध्वं भो विप्रा मद्वाचं दत्तमानसाः ॥ १५ ॥

भूमेर्भारायमाणायाः क्षत्रियैर्ब्रह्मघातिभिः ।
अवतीर्णोऽस्मि कलया रक्षार्थं क्षत्रियांतकः ॥ १६ ॥

भृगोः कुले सुविपुले रामोऽहं विष्णुरव्ययः ।
क्षत्रं नीतं क्षयं क्षोणी काश्यपायार्पिताखिला ॥ १७ ॥

स्वकृते निर्मिता भूमिः सह्याधः सागरोदरे ।
तत्र साक्षात्स्वयं शंभुर्मद्वात्सल्यादधिष्ठितः ॥ १८ ॥

भक्तानुकंपी भगवानाशुतोषोऽभयप्रदः ।
मुनयश्च महाभागाः क्लृप्तरम्यनवोटजाः ॥ १९ ॥

तत्र तीर्थानि भूरीणि पावनानि महान्ति च ।
सरितां च पतिस्तत्र तीर्थराजोऽन्तिकस्थितः ॥ २० ॥

तत्र वो नेतुमिच्छामि स्वान्मत्वा स्वाश्रमांतिके ।
सुखं तत्र समाध्वं भो मद्बाहुबलपालिताः ॥ २१ ॥

तत्र वो वसतां क्वापि कापि नार्त्तिर्भविष्यति ।
न भविष्यति दारिद्र्यं न रोगा नापमृत्यवः ॥ २२ ॥

नेतयो नाप्रजस्त्वं च नाल्पायुष्त्वंच कर्हिचित् ।
न पैशाच्यं न निरयो न रक्षोभ्यो भयं क्वचित् ॥ २३ ॥

भुक्तिमुक्ती उभे तत्र श्रीगिरौ तत्र मिश्रिते ।
शश्वद्गोप्तास्मि यत्राहं मृत्युमृत्युः परस्वधी ॥ २४ ॥

अविचार्याविलंबेन समायातापसंशयः ।
सत्यात्मकोऽस्म्यहं विप्रा नासत्यं मयि विद्यते ॥ २५ ॥

इत्थं महर्षिणा प्रोक्ता मिथ आमंत्र्य मंत्रिणः ।
ज्ञात्वा तमादिपुरुषमादृता द्रुतमन्वयुः ॥ २६ ॥

रामोऽपि तान्समानीय षष्टिसंख्यान्कुटुंबिनः ।
पवित्रगोत्रान् गोत्रायां तद्वासार्थं स्वसंनिधौ ॥ २७ ॥

पुरं पुरंदरपुरप्रतिमं विश्वकर्मणा ।
कारयामास सर्वेशः सर्वसंपद्विभूषितम् ॥ २८ ॥

सुंदरैः सद्मभिः सौधैर्नानावीथीचतुष्पथैः ।
जुष्टं व्युष्टं प्रसृष्टाट्टं दृष्टितुष्टिकरं परं ॥ २९ ॥

रामतीर्थस्य नद्याश्च प्रत्यग्दक्षिणयोः क्रमात् ।
तत्र तान्स्थापयामास ब्राह्मणान्ब्राह्मणाग्रणीः ॥ ३० ॥

यथाधिकारं रम्येषु स्वर्धामत्सु गृहेष्वथ ।
रामस्य चित्तमपुनात्पूर्णकामस्य तद्यतः ॥ ३१ ॥

पुरं हृद्यतमं नाम्ना विदधे चित्तपावनं ।
ततस्ते ब्राह्मणास्तत्स्था नाम्नासंश्चित्तपावनाः ॥ ३२ ॥

अथोवाच द्विजान्नैजान् रामो राजीवलोचनः ।
नभः कृष्णत्रयोदश्यां संध्यायां निर्मितं मया ॥ ३३ ॥

क्षेत्रमेतत्पुरं चैतद्भवद्भिः स्वीकृतं यतः ।
तस्मिन्नेवाद्यसमये तस्मादेतां महीं मम ॥ ३४ ॥

प्रत्यब्दमद्यप्रभृति सर्वे पूजयतादृताः ।
भवंतो मामका विप्रा महीयं खलु मामिका ॥ ३५ ॥

यतो जन्मदिनं देव्याः पूजनीयं महामहैः ।
इत्युक्ता ब्राह्मणाश्चक्रुर्भूमिपूजां महोत्सवां ॥ ३६ ॥

कृष्णश्रावणिकानंगे संध्याकाले हरेः पुरे ।
सेयं विधीवतेद्यापि ब्राह्मणै रामपालितैः ॥ ३७ ॥

ततः परशुरामस्तान्पालयामास भूसुरान् ।
सर्वतः सर्वकामैश्च समवर्धयदीश्वरः ॥ ३८ ॥

तेषां भार्गवगुप्तानां व्याधयो न च नाधयः ।
नावर्षणं नातिवृष्टिर्नापमृत्युर्न दुर्दशा ॥ ३९ ॥

सर्वे बभूवुः संहृष्टा नष्टक्लेशाश्चिरायुषः
कीर्ति परशुरामस्य गायंतो गतकल्मषाः ॥ ४० ॥

अनेहसाल्पकेनाथ महिमानं महात्मनः ।
श्रुण्वंतः सर्वतो दिग्भ्यः समेता बहवो जनाः ॥ ४१ ॥

नानादेश्या भूरिवंश्याश्चतुर्वर्णाश्रमात्मकाः ।
कृतोदर्कभृगूत्तंससाम्राज्यसुखलंपटाः ॥ ४२ ॥

ते रामानुमताः स्वैरं रामक्षेत्रे कृतक्षयाः ।
सुखमासन् रामनाथाः स्मरंतो राममन्वहं ॥ ४३ ॥

यथा चंदनसंभर्ता मलयाद्रिस्तदाश्रितान् ।
निपाकादींश्चंदनवत्करोति स्वगुणांशिनः ॥ ४४ ॥

तथा रामः स्वविप्राणां संगत्यान्यानपि द्विजान् ।
चक्रे स्वक्षेत्रनिलयान्स्वामुक्रोशांशभागिनः ॥ ४५ ॥

शुशुभे भार्गवक्षेत्रं तद्रक्षितजनर्द्धिभिः ।
मुनीनामाश्रमैः पुण्यैः पुण्यतीर्थैरनेकशः ॥ ४६ ॥

नानाद्रुमलतागुल्मैर्नानामृगपतत्त्रिभिः ।
नानाशिलोच्चयैरुच्चैर्नानाकसनकाननैः ॥ ४७ ॥

वेशंतैः सरसीभिश्च नानासिंधुभिरंधुभिः ।
नानाप्रस्रवणैः खातैः सर्वतोलमलंकृतं ॥ ४८ ॥

वातो वाति स्म सौम्यस्तपति दिनकरो न स्म तीक्ष्णैर्मयूखै-
र्दिद्रः कामं ववर्ष क्षितिरधिकफला धेनवः कामदोग्ध्यः ।
काष्ठाः शश्वत्प्रसेदुः शिवगगनचरा यौननुत्प्रातविद्यु-
त्सर्वेशे त्राणशीले जयति भृगुपतेः क्षेत्रमुच्चैः स्म तस्मिन् ॥ ४९ ॥

॥ इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ क्षेत्ररचनावर्णनो नाम पंचमः सर्गः ।

— ६ —

अथ काले सुमहति व्यतीते भगवान् हरिः ।
रामो दाशरथिर्नाम कलया क्षत्रियेष्वभूत् ॥ १ ॥

यथा भार्गवरूपेण क्षत्रियाणां क्षयाय हि ।
तथा राक्षसनाशार्थं त्रिदशैः प्रार्थितः किल ॥ २ ॥

तेनैकदा जामदग्न्यो रामो रामेण संगतः ।
विज्ञातुं गां गतं विष्णुं चापभंगरुषो मिषात् ॥ ३ ॥

ज्ञात्वा तमादिपुरुषं क्षत्रियं राक्षसांतकं ।
विरराम ततो रामः क्षत्रियाणां महाक्षयात् ॥ ४ ॥

शांति प्रपेदे परमां पैतृकीं कृतनिश्चयः ।
तपश्चचार तीर्थार्थी स्वक्षेत्रनियतक्षितिः ॥ ५ ॥

राघवस्तु गुरोर्वाक्यादेकदा निवसन्वने ।
ससीतां लक्ष्मणोऽपृच्छन्मुनिं कलशसंभवं ॥ ६ ॥

विंध्यस्योत्तरदिग्भागे स्फीतो जनपदो महान् ।
दक्षिणे विरलः कस्मात्प्रक्षीण इव लक्ष्यते ॥ ७ ॥

तमुवाच मुनिस्तात राक्षसैः सुदुरात्मभिः ।
देशोऽयं पीडितः कृत्स्नो दशकंधरपालितैः ॥ ८ ॥

दक्षिणस्याम्बुधेरन्तः शतयोजनतस्तटात् ।
त्रिकूटकूटगा रम्या लंका नाम महापुरी ॥ ९ ॥

तत्र ब्रह्मवरोन्मत्तो रावणो लोकरावणः ।
वर्वत्ति धनदभ्राता दुष्टस्त्रैलोक्यकण्टकः ॥ १० ॥

तत्पालितैः पुण्यजनैर्जनस्थानात् भृशार्दिताः ।
त्यक्त्वा पदानि मुनयो जग्मुः प्राणपरीप्सवः ॥ ११ ॥

कुर्वन्ति क्रतुविघ्नानि हविर्भागान्हरन्ति च ।
कालयंत्यबलांस्तस्माद्विरला बलिनः स्थिताः ॥ १२ ॥

इत्याकर्ण्य महातेजाः काकुत्स्थो विस्मितो मुनिं ।
अब्रवीत्किमभूवन्नो भूपाला बलशालिनः ॥ १३ ॥

अहो शस्त्रभृतां श्रेष्ठो जमदग्निसुतो मुनिः ।
स कथं नावधीदेनं महाबलपराक्रमः ॥ १४ ॥

यस्य कारागृहे वासं कृतवान् दशकन्धरः ।
स हतो हैहयो येन स एनं नावधीत्कथं ॥ १५ ॥

सिंधुरुत्सारितो येन किल नाराचवेगतः ।
ब्रह्मक्षत्रौजसाढ्येन न लंका प्लाविता कथं ॥ १६ ॥

मैत्रावरुणिरित्युक्तो राघवेणानुपूर्वशः ।
वर्णयामास वृत्तान्तं तयोः सन्धानकारणं ॥ १७ ॥

ततः कोपपरीतात्मा रामः स्वागस्कृतः खलात् ।
जघान राक्षसान्संख्ये ऽसंख्यातान्खरपूर्वकान् ॥ १८ ॥

तच्छ्रुत्वा रावणो मंदः स्वमृत्युमविचारयन् ।
जहार रामदयितां मैथिलीं कालचोदितः ॥ १९ ॥

अथोद्दिदीपे रामस्य कोपवैश्वानरो भृशं ।
यथा सलिलसंपर्काच्छातह्रद इवानलः ॥ २० ॥

हनूमत्प्रमुखैर्वीरैर्वृतं वानरपुंगवं ।
अभिसंधाय सुग्रीवं प्रययौ तज्जिगीषया ॥ २१ ॥

कोदण्डं सुप्रचण्डं प्रतिविततगुणं वामपाणौ च दक्षे
बाणं कद्यां कृपाणं स्वहिमिव सुफणं स्वर्णनाराचपूर्णं ।
पृष्ठे तूणं तथैणं रचितमणिगणं वारवाणं च शोणं
बिभ्रद्रामोऽभिरामो जगति विजयते संवृतो वीरलक्ष्म्या ॥ २२ ॥

बध्वा सेतुं समुद्रे दशमुखनगरीं वानरैरर्दयित्वा
पौलस्त्यं सानुबंधं यमपुरमिषुभिर्गन्तुमुद्वासयित्वा ।
लंकायां स्थापयित्वा तदनुजमनघं मैथिलीमानयित्वा
कृत्वा लोकं विशोकं क्षितिमथ बुभुजे राघवो रामचन्द्रः ॥ २३ ॥

माहात्म्यं यस्य बाह्वोस्त्रिपुरहरधनुः पादयोर्गौतमस्त्री
पौलस्त्यः पौरुषस्य क्रुध उदकनिधिर्ब्रह्मचर्यस्य सीता ।
सन्धेः पौलस्त्यबन्धुः प्लवगकुलपतिर्मित्रताया हनूमा-
न्भक्ते राज्यस्य पुत्री द्विज इह बुबुधे रामभद्र स वो व्यात् ॥ २४ ॥

सीतासमालिङ्गितवामभागं
सौमित्रिसञ्चालितचामरं तं ।
धृतातपत्रं भरतेन वन्दे
सिंहासनस्थं रघुराजसिंहं ॥ २५ ॥

कौशल्यावेदिकोत्पन्नं विश्वविस्तारमिष्टदं ।
सीतालतासमायुक्तं रामकल्पद्रुमं भजे ॥ २६ ॥

येनाकारि बिभीषणः प्रियतमो लंकापुरीनायक-
श्चन्द्रार्कावधि गन्धमादनगिरौ सञ्जीवनस्यात्मजः ।
स्वच्छन्दाहितभोगभागभिनवेनाकेतुकं पावता
नीताः पौरजना विधाय बुधतां रामाय तस्मै नमः ॥ २७ ॥

॥ इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ रामावतारवर्णनो नाम षष्ठः सर्गः ॥

— ७ —

कृतकार्येऽथ काकुत्स्थे कृष्णो वृष्णिष्ववातरत् ।
साक्षान्नैजेन रूपेण भूमिभारजिहीर्षया ॥ १ ॥

स जरासन्धसङ्ग्रामेष्वभीतो भीतवत्स्थलात् ।
पलायन्बलसंयुक्तो बलवान् जलदप्रभः ॥ २ ॥

ददर्श भार्गवं मार्गे प्रणम्य शिरसाथ तं ।
तदादेशान्महातुङ्गं गतो गोमन्तकं गिरिं ॥ ३ ॥

स द्विषड्योजनोत्सेधात्तस्मान्मागधवेष्टितात् ।
पुप्लुवे तेन गिरिराट् भाराक्रान्तो धरां गतः ॥ ४ ॥

तत्र गोमन्तकं नाम प्रथितं तीर्थमुत्तमं ।
साक्षात्कृष्णाङ्घ्रिकमलनिर्मितं निर्ममत्वकृत् ॥ ५ ॥

अथ श्रीकृष्णचरणस्मरणोद्बुद्धचेतनः ।
तच्चरित्राणि चित्राणि व्याहरन्स्तौम्यनुक्रमात् ॥ ६ ॥

अरिसीरायुधौ साम्बुनिरम्बुजलदप्रभौ ।
वन्दे कृष्णबलौ देवौ देवकीरोहिणीसुतौ ॥ ७ ॥

श्रीगोगगोजनकगोपतिपूजिताङ्घ्रि
गोगोपगोपवनितागणसम्परीतं ।
गोपालकाङ्गजमजं निजमाययात्त-
गोपालरूपमहमाकलयामि कृष्णं ॥ ८ ॥

गुञ्जाव्रजेन परिरञ्जितवेणुपाणिं
बर्हावतंसपरिमण्डितचारुगण्डं ।
कृष्णं स्मरामि नवनीरदनीलकान्तिं
दीव्यत्कदम्बकुसुमावलिमालिताङ्गम् ॥ ९ ॥

भूभूरिभारहरणाय कृतावतारं
त्रैलोक्यमोहनमहारमणीयरूपं ।
लोके विचित्रचरितानि समाचरन्तं
सञ्चिन्तयेऽच्युतमचिन्त्यचरित्रमन्यैः ॥ १० ॥

बालः क्षणं रुदति रिङ्गति च क्षणेन
शूरः क्षिणोत्यरिगणान् क्षणमीक्षते गाः ।
बिभ्रत्क्षणक्षणविलक्षणलक्षणानि
लक्ष्मीपतिर्जयति नीलसरोरुहाक्षः ॥ ११ ॥

बालेन बद्ध्यमुनिवृत्तिरकारि येन
त्रैमासिकेन शकटं प्रकटं पदारवे ।
क्षिप्तं महानिलमयो दनुजस्तथाधो
ध्वस्तः स्मरामि हरिमद्भुतबालकं तं ॥ १२ ॥

योऽघासुराननमशेषवयस्यवत्स
व्रातं गतं बत जुगोप जघान तं च ।
भित्वा स्वयं च बकचञ्चुमपीव्यवीर्यो
यातः समाद्भुततमाचरितः समाव्यात् ॥ १३ ॥

वत्सेषु पालसहितेषु हृतेषु धात्रा
तद्वत्सवत्सपवयोगुणवेषरूपी ।
सद्यः स्वयं समभवद्बहुरूप्यनन्तो
मायामनुष्यवपुरादिपुमान्समाव्यात् ॥ १४ ॥

यः कालियं विषधरं यमुनाह्लदान्त–
र्गम्भीरनीलनिलयादुदपाजहार ।
दावानलं च सकलं स्वकुलक्षयाय
प्राप्तं पपौ स भगवान् भवतोऽवतान्मां ॥ १५ ॥

यः सप्तहायनवया बत सप्तरात्रं
गोवर्धनाचलमबिभ्रददक्षहस्ते ।
गोगोपपूगमतिगोदरयाज्जुगोप
तं गोपतिं शरणदं शरणं प्रपद्ये ॥ १६ ॥

योरिष्टमुष्टिकमहागजकेशिकं स–
चाणूररासभवरद्विविदादिदैत्यान् ।
क्रीडन् जघान बलिनोप्यवलीलयैव
प्रेष्ठः स हन्तु जगदार्त्तिहरो मदार्त्ति ॥ १७ ॥

कौरव्यसंसदि यदासवराजसूये
क्षिप्तो दुरुक्तिविशिखैर्दमघोषजेन ।
तस्यारिणासृणि शिरःशमलं जहार
सद्यः सुदुष्टदमनं तमनन्तमीडे ॥ १८ ॥

क्ष्वेडान्महादहनतः पुरुषादतश्च
दुःपर्षदोदवनिवासदुरन्तदुःखात् ।
प्रत्याहवं पररयाच्च जुगोप पार्थान्
यस्तं प्रपन्नपरमार्त्तिहरं प्रपद्ये ॥ १९ ॥

आचार्यमातुलपितामहबन्धुहत्या
भीत्या रणादुपरतस्य धनञ्जयस्य ।
सद्यो जहार कुमतिं निजविद्यया यः
सोव्यान्मतिं मतिमतां वर ईश्वरो मे ॥ २१ ॥

दुर्योधनप्रमुखदुर्जनभूपरूप–
दैत्यान्निहत्य सकलान्सबलान्बलीयान् ।
भारं क्षितेः समहरत्स हरिर्विहारं
कामं क्रियादहरहर्हृदये मदीये ॥ २२ ॥

यस्याद्भुतानि चरितानि कपर्दिकाद्या
गायन्ति पूर्णसुखसागरसम्प्रमग्नाः ।
गोपाश्च गोपचरितानि रतानि गोप्य–
स्तं नन्दनन्दनमहं कलये मुकुन्दं ॥ २३ ॥

यन्नाभिभूरभवदस्य भव प्रभुः कः
केयत्पदाम्बु परिगृह्य शिवः शिवोऽभूत् ।
लब्ध्वा द्विजा यमभवन्सकलार्थितेक्षा
सर्वात्मनापि शरणं तमजं व्रजेऽहं ॥ २४ ॥

यत्पादपङ्कजपरागपराः प्रकामं
पारं प्रयान्ति भविनो भवसागरस्य ।
तं त्वां परावरपतिं परमानुभावं
पूर्णं प्रधानपुरुषं शरणं प्रपद्ये ॥ २५ ॥

श्रीकृष्णकृष्णसखवृष्णिवरेण्यविष्णो
वैकुण्ठकेशवजनार्दनवासुदेव ।
नारायणामरण वैरिहरारिपाणे
गोविन्द देव जगदीश नमो नमस्ते ॥ २६ ॥

नलिनचारुनयने घननीले
पुरटपिङ्गटपटे सुकिरीटे ।
धृतकलापि सुकलापकलापे
मम गतीरतिमती यदुनाथे ॥ २७ ॥

इत्थं पोतं भवजलनिधौ मज्जतां ज्योतिरेकं
शोकागाधे तमसि पततां कर्मबन्धच्छिदासिं ।
मायामार्त्तैरगदममृतं कांक्षतां कल्पवृक्षं
लक्ष्मीवासं मनसि कलये पंङ्कक्षाश्रयाशं ॥ २८ ॥

उद्वर्णैः कर्णिकारैः श्रवणविवरयोरुल्लसन्तं लसन्तं
मायूरैः पिच्छभारैर्मृगमदतिलकं भालमूले दधानं ।
धम्मिल्लं स्कन्धदेशे सुविमलतुलसीमञ्जरीदाम कण्ठे
स्वाङ्गे भङ्गित्रिकाङ्कं मधुरमुरलिकं गोपकं कञ्चिदीडे ।। २९ ।।

।। इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
कृष्णावतारवर्णनो नाम सप्तमः सर्गः ।।

— ८ —

अथोद्धृतधराभारे स्वधामोपगते हरौ ।
धर्महारी दुराचारी पापः कलिरवर्त्तत ॥ १ ॥

प्रविष्टमात्र एतस्मिन् द्वित्रा ब्राह्मणपुत्रकः ।
रामतीर्थान्तिके गत्वा मिथ इत्थममंत्रयन् ॥ २ ॥

प्रभुः परशुरामोऽस्मान्मृत्योस्त्रातेति नः श्रुतम् ।
प्रत्ययं तस्य पश्यामो मिथ्यामृतककैतवात् ॥ ३ ॥

इति संमन्त्र्य दुर्वृत्ता बालिशाः कलिकालिताः ।
वाससा वेष्टयित्वैकं मृषाप्रेतं प्रचुक्रुशुः ॥ ४ ॥

हा राम हा भृगूत्तंस हा महाभाग हा विभो ।
पाहि नो बाधितान्दीनानकाले बत मृत्युना ॥ ५ ॥

इत्युच्चैः क्रन्दितं तेषामाकर्ण्य भृगुनन्दनः ।
विश्वव्यापी महासत्वः पपात सहसा पुरः ॥ ६ ॥

रुद्राक्षमालावलयः कुशपाणिस्त्रिपुण्ड्रधृक् ।
निशातं परशुं बिभ्रद् भृकुटीकुटिलाननः ॥ ७ ॥

क्रोधरक्तेक्षणः स्विन्नः कोटिकीनाशनाशनः ।
मा भैष्टेति भणन्स्पष्टं तिष्ठदग्रे दुरात्मनाम् ॥ ८ ॥

क्रोधाग्निमुद्वमन्तं तं दोधूयन्तमिवोरगं ।
समुद्वीक्ष्यातिसन्त्रस्तास्तूष्णीमासन्नवाङ्मुखाः ॥ ९ ॥

रामोऽथ तेषां कौटिल्यं ज्ञात्वा सर्वज्ञ ईश्वरः ।
अशपत्तान् कूटकृतो द्विजानागस्कृतो मुनिः ॥ १० ॥

यतः कूटविधानेन भवद्भिर्वञ्चितोऽस्म्यहं ।
अतः कूटस्थनामानो भवत ब्राह्मणा भुवि ॥ ११ ॥

अद्यप्रभृति चाहं वः केषामपि च कुत्रचित् ।
प्रत्यक्षो न भविष्यामि गूढः स्थास्याम्युदासवत् ॥ १२ ॥

यथा साधारणा लोकाः साधारणधरास्थिताः ।
मद्धरायां तथैवाध्वं विशेषो नात्र मत्कृतः ॥ १३ ॥

ततः श्रुतसमाचारा वृद्धाः संपक्वबुद्धयः ।
समेत्य चित्तपा विप्राः प्रार्थयामासुरञ्जसा ॥ १४ ॥

राम राम महाभाग शरणागतवत्सल ।
एकेषामपराधेन क्रोधः सर्वेषु ते कथम् ।। १५ ।।

त्वदेकनाथास्त्वत्क्षेत्रे वसामो विगतज्वराः ।
विमुखे त्वय्यनाथार्त्ताः किंकराः करवाम किम् ।। १६ ।।

त्वय्युदासीनतां प्राप्ते कस्त्राता नः कृपानिधे ।
जहि कोपं प्रसन्नेषु प्रसन्नो भव भार्गव ।। १७ ।।

इत्थमालपमानांस्तान्समस्तान्प्रणतान्द्विजान् ।
द्विजाग्रणीः प्रत्यभाषीत्साभिप्रायमिदं वचः ।। १८ ।।

नायं दोषोऽस्ति केषांचित्कलेरेष दुरात्मनः ।
सोऽद्य प्रविष्टो दुष्टात्मा धरित्रीं धर्मकर्शनः ।। १९ ।।

अस्मिन्पापे पापरूपा दाम्भिका बकवृत्तयः ।
अल्पायुषो दुर्मनीषाः सम्भविष्यन्ति मानुषाः ।। २० ।।

परनिन्दापरा नन्दा मन्दाः सन्दिग्धबुद्धयः ।
देहात्ममतयो मूढास्तत्वज्ञानपराङ्मुखाः ।। २१ ।।

अविक्रेयक्रयपराः स्त्रीजिताः काम्ययाजकाः ।
उदरम्भरयो जाल्माः शिश्नोदरपरायणाः ।। २२ ।।

धनधान्यादिलोभेन शूद्रेभ्यो नियमप्रदाः ।
अधीतविद्याः स्फीत्यर्थं परधिक्करणाय च ।। २३ ।।

जिह्मव्यवहृता लुब्धाः शौचाचारविवर्जिताः ।
परस्त्रीलम्पटाः स्तेनाः पिशुनाः सत्यवर्जिताः ।। २४ ।।

शुनामिव कपीनां वा वर्णसङ्करकारकाः ।
नीचसेवापराः शूद्रधर्माणः काकवृत्तयः ।। २५ ।।

सन्तुष्टाः परदुःखेन दुःखिताः परशर्मणा ।
वेदविक्रयिणो विप्राः पाखण्डा निरपत्रपाः ।। २६ ।।

नृपाश्चोरसधर्माणो वैश्याः शूद्राश्च मिश्रिताः ।
द्विजवेषधराः शूद्रा भविष्यन्ति कलौ युगे ।। २७ ।।

पुत्राः पित्रोरपोष्टारो मिथश्चैषां महान्कलिः ।
पतिहीनाः स्त्रियोऽस्त्रीकाः पुमांसः कन्यकाप्रजाः ।। २८ ।।

पापसंगोपनपराः पुण्यलेशप्रकाशकाः ।
आत्मस्तुतिरता हणाः परांश्छिद्रे प्रहारिणाः ।। २९ ।।

यवनाश्चावनीशानाः प्रजापीडनतत्पराः ।
सर्वस्वहारिणो दुष्टा भविष्यन्ति कलौ युगे ॥ ३० ॥

अस्मिन्खलानामुदयः साधूनां तद्विपर्ययः ।
मही मन्दफला चास्मिन्भविष्यति न संशयः ॥ ३१ ॥

अस्मिन्पापयुगे भूमौ न स्थास्यन्ति सुधांधसः ।
पुण्यनद्य गङ्गाद्या गावो वेदा द्विजा मखाः ॥ ३२ ॥

देवानां दर्शनं नास्मिन्धर्मश्चास्मिन्बतैकपात् ।
अतः स्थास्यामि गूढोऽहं ज्ञात्वा कालविपर्ययम् ॥ ३३ ॥

न कोपान्नापराधाद्वो निमित्तं स हि केवलं ।
कलिमेवागतं ज्ञात्वा प्रत्यक्षं पश्यते मया ॥ ३४ ॥

गूढोऽपि भवतां नित्यं भजतां प्रीतिपूर्वकं ।
कैतवातीतभावानां त्रातास्म्यहमसंशयम् ॥ ३५ ॥

अद्य पात्रत्वभजतां भक्तत्रासमहं खलु ।
अतःपरं भविष्यामि भजतामेव भक्तितः ॥ ३६ ॥

स्वतः प्रवृत्तोऽतः पूर्वं पक्ष्मेवाक्षणस्त्वतः परं ।
भक्त्या प्रवर्तितोऽहं वस्त्राता नेत्रस्य पाणिवत् ॥ ३७ ॥

यूयं पापस्य तिष्यस्य यतध्वं मूलकृंतने ।
मूलमष्टापदं ह्यस्य यदधर्मेण संचितम् ॥ ३८ ॥

तस्मादधर्महीनानां कलिः किं वः करिष्यति ।
किंच मद्भक्तियुक्तानां नास्ति भीतिः कलेः क्वचित् ॥ ३९ ॥

भजनार्थं मम गिरौ मम मूर्तिं दृषन्मयीं ।
मम कृत्वा विधानेन स्थापयध्वं समाहिताः ॥ ४० ॥

तत्र पूजाप्रणामादिकल्पितं भक्तियोगिभिः ।
ग्रहीष्यामि भविष्यामि भवतां कामदः कलौ ॥ ४१ ॥

इत्युक्त्वा मिषतां तेषामृषिरन्तर्हितस्ततः ।
गूढश्चरति चेदानीं चिरंजीवी चिरन्तनः ॥ ४२ ॥

द्विजास्तु कृत्वा रामस्य मूर्त्तिस्थापनशासनं ।
तत्तथैव तमेवैकमाराध्यासन्सुनिर्वृतीः ॥ ४३ ॥

त इमे चित्तपा विप्राः कृपापात्राणि तन्मुनेः ।
येषामेकः कुलाचारो रामबाणस्य पूजनम् ॥ ४४ ॥

अथ राममतं ज्ञात्वा भगवान् भक्तवत्सलः ।
व्याडिना स्थापिते लिङ्गे स्थाणु स्थाणुरिवाभवत् ॥ ४५ ॥
सोऽयं प्रभुर्भार्गववत्सलः स्वयं
वाडेश्वरो देववरो ममेश्वरः ।
ग्रामे गुहाख्ये महनीयविग्रहो
जागर्त्ति नित्यं महतामभीष्टदः ॥ ४६ ॥

॥ इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
रामतिरोधानो नामाष्टमः सर्गः ॥

— ९ —

अथ कलिमनुवृत्तं कालगत्या विदित्वा
सकलमुनिसमूहा भार्गवक्षेत्रसंस्थाः ।
निजनिजनिलयेषु स्थापयित्वामरेशान्
हरिचरणनिघृष्टा संप्रविष्टा विशालां ॥ १ ॥
येन येन मुनिना खलु यो यः
स्थापितो निजपदे त्रिदिवेशः ।
तस्य तस्य हि मुनेरिह नाम्ना
पप्रथे स स भृगूद्वहभूमौ ॥ २ ॥
एवं स्थापकसंज्ञाभिर्गुणकर्माङकितानि च ।
देवानां नामधेयानि बभूवुर्भुवि भूरिशः ॥ ३ ॥
अथाभवद्भूमितले कलौ युगे
शकस्य कर्त्ता किल शालिवाहनः ।
गोदावरींदक्षिणतीरनीवृति
व्यतीत शाकद्वयकाल लीलया ॥ ४ ॥
सामंताः समितिजया बभूवुरस्य
क्षोणीशाः क्षपितविपक्षपक्षलक्षाः ।
बिभ्राणा शकपतिशासनं शिरोभिः
कुर्वन्तो वरवसुभाजमेनमीशम् ॥ ५ ॥
तेष्वासन् शुद्धसत्वा हिमकरदिनकृद्वंशजाः कीर्तिमंतो
रामक्षेत्रे पवित्रे कतिचन नरपाः क्षत्रियास्तीक्ष्णवीर्याः ।
सह्याद्रेः सिंधुगाभिर्व्यवहितविषयास्तन्महानिम्नगाभिः
साम्राज्ये लब्धदीक्षाः क्षपितकलिमला भार्गवाराधनेन ॥ ६ ॥

नानादेशविदेशभूतिभिरभूत्क्षेत्रं समृद्धं मुने-
र्नानानीपकसेवितैर्नृपतिभिर्नानाविधैः पत्तनैः ।
नानासप्रभिरूर्जितैः कृतसुधैर्नानाविधैर्देवता-
गारैर्ग्रामवरैर्व्रजैर्द्रुमवनैः खेटैस्तथा खर्वटैः ।। ७ ।।

देशे देशे पत्तनं यत्र रम्यं
राजा धन्यः पत्तने पत्तने च ।
लोकः श्रीमान् यत्र तत्तत्क्षितीशे
लोके लोके यत्र धर्मैकनिष्ठा ।। ८ ।।

तत्रायं सुपवित्रः क्षेत्रे रामस्य सुंदरो देशः ।
गूढो नाम्ना यस्मिन्वासं वांछन्त्यपि त्रिदशाः ।। ९ ।।

यस्मिन्देशे मध्यवर्ती विशालो
मुख्यो नाम्ना गूढ इत्युच्यते यः ।
राज्ञः स्थानं दुर्गवान् ग्रामवर्य-
स्तस्माद्देशो गूढ इत्याप संज्ञाम् ।। १० ।।

यस्मिन्व्यूढं पत्तनं चित्तपाख्यं
यस्मिन् रूढं प्रौढवाडेशलिंगं ।
यस्मिन्गूढो जामदग्न्यः सदास्ति
तस्माद्देशो गूढनाम्ना प्रसिद्धः ।। ११ ।।

बभूवुरस्मिन्बहवो नरेशा
विभक्तदेशा विततैकवंशाः ।
यत्तामिथो देशविभाग सीमा
संरक्षणे द्वित्रिकखेटकेशाः ।। १२ ।।

अभूद्भूपतिः कायुराणाभिधानः
सुधांशुप्रभो गूढदेशैकदेशे ।
गुहाकानने संस्थितो दुर्गवासी
सुतः साकुराणाभिधस्तस्य वीरः ।। १३ ।।

शूरो विद्वानास्पदं संपदां यः
सीमाभूमिर्दानशीलाग्रणीनां ।
चातुर्यौदार्यातिगंभीरधैर्या-
र्यत्वादीनां स्थानमेकं गुणानाम् ।। १४ ।।

कोऽपि नास्य गुणवर्णने क्षमः
क्ष्मातलेऽब्धिवलयेऽपि दृश्यते ।
क्लिश्यते च गणकैरपि ध्रुवं
यद्गुणौघगणनानियत्तया ।। १५ ।।

पाषाणरेखासखमस्य रेखा
प्रमाणमप्यत्र पतत्रिणेपि ।
अतिक्रमन्ति स्म न शासनं त-
न्नरा जहुर्नेति किमस्ति चित्रं ।। १६ ।।

यत्कीर्तिवल्ली भुवने मतल्ली
ब्रह्माण्डभाण्डोदरमण्डपेऽस्मिन् ।
तताचितोच्चैर्लघुभिर्भपुष्पै-
र्विभाति यस्याः फलमेष चंद्रः ।। १७ ।।

दानप्रदा यत्करिणोपि नूनं
तद्दानशक्तिः किमु वर्णनीया ।
सेनास्य गंधर्ववती हतारे-
रलं प्रतापस्तवनेन तस्मात् ।। १८ ।।

सचिवैः सह कार्यमंत्रणे
युयुजे वैरिजयप्रयोगवित् ।
प्रकृतीः स कृती समैक्षत
स्वयमन्यायहरश्चरैरपि ।। १९ ।।

स्वयमस्त्रविद्गतजनभयोपि
परिजनचयेन संवृतः ।
दुर्गवसतिरधिज्यधनु-
र्नृपतिर्बभूव सततं समाहितः ।। २० ।।

तस्य दुर्गपतेर्दुर्गगोपनाय निवेशितः ।
परितः परिवेषोभूत्कर्माराणां सममंरः ।। २१ ।।

एष वाडेश्वरस्तत्र भगवान्वेणुगुल्मगः ।
अलक्षितपदो दैवादासीद्योगेश्वरो विभुः ।। २२ ।।

पुरे वने वौकसि कुंजके वा
घोर्तेंधकारे भुवि वांबरे वा ।
शिलातले वा शयनोत्तमे वा
विभोर्विराजः किमुतास्य भूम्नः ।। २३ ।।

वेणुगुल्मनिषण्णस्य वाडेशस्य जगद्गुरोः ।
समीपदेशे वडवामंदुरासीद्दिशां पतेः ॥ २४ ॥

गर्भिण्यो वडवा या यास्तास्तास्तस्यां निशेविताः ।
वाजिहृद्वेदिभिर्वैद्यैः प्रभूतिकुशलैः सह ॥ २५ ॥

तच्छावदुग्धपानार्थं स्थापितास्तत्र धेनवः ।
तासां सुरभिवंशीया कपिलैकाभ्यवर्तत ॥ २६ ॥

सा जानती जगन्नाथं वाडेशमखिलेश्वरं ।
स्वौधस्येनाभिसिषिचे नित्यमज्ञातसंचरा ॥ २७ ॥

एकदा गोपतिं क्रुद्धो वाडाधीशोभ्यतर्जयत् ।
कथयिष्याम्यद्य नृपमपराधं तवाधम ॥ २८ ॥

सदा कापिलकं क्षीरं पिबसि त्वं सुदुर्मते ।
अलक्षयित्वा राजानं वधं प्राप्स्यसि निश्चितम् ॥ २९ ॥

पयस्विनीयं कपिला साध्वी त्वत्पीतदुग्धिका ।
वत्सस्यापि पयो नास्याः क्वाश्विनीपोतकाय तत् ॥ ३० ॥

इत्युक्तवन्तं वडवापालकं पालको गवाम् ।
प्रणम्य प्रार्थयामास शपथैर्बहुभिर्बहु ॥ ३१ ॥

न मया कापिलं स्वामिन्न वान्यदपि कर्हिचित् ।
स्तन्यं स्तैन्येन धयितं तुल्यं तच्छोणितेन मे ॥ ३२ ॥

अद्याहं कपिलां यत्तः संरक्षामि क्षमस्व भो ।
दिनमेकं दीनपते यतेऽहं क्षीरमार्गणे ॥ ३३ ॥

इत्याराध्याश्वपं प्रागाद्गोपतिर्गोवनं वनं ।
कपिला तु यथापूर्वं वञ्चयित्वा च बल्लवम् ॥ ३४ ॥

तृणध्वजालयं प्राप्य पयो लिङ्गेऽभ्यपातयत् ।
गोपतिस्तामनुगतो ददर्श सकलं छलात् ॥ ३५ ॥

क्रुद्धो लगुडमादाय संताड्य कपिलां भृशं ।
लिङ्गं निष्ठुरघातेन निर्जघ्ने स्फोटयन् हठात् ॥ ३६ ॥

ततो दयावानधियो मनुष्या
रामार्थितं कामघनाघनं मां ।
जानन्तु संछन्नमिहेति मत्या
लिङ्गे कुस्रुतयाऽस्रमवर्शयत्तम् ॥ ३७ ॥

दृष्ट्वा तदद्भुतं गोपो वाडाधिपतये द्रुतं ।
तस्मै सर्वं समाचख्यौ सोऽपि दृष्ट्वाऽतिविस्मितः ।। ३८ ।।

गत्वा न्यवेदयामास सांकुराणमहीभुजे ।
आनुपूर्व्येण सकलं वृत्तान्तं शृण्वतां सताम् ।। ३९ ।।

श्रुत्वा तच्चित्रमतुलं राजा राजीवलोचनः ।
मंत्रिभिः सहितः सद्भिर्लिङ्गाभ्याशमुपाययौ ।। ४० ।।

क्षरदस्त्रं शिलापृष्ठे निष्ठुरं दण्डपीडिते ।
सचेतनशरीरेवा दृष्ट्वा किमिति विस्मितः ।। ४१ ।।

कियानस्त्येष पाषाणः कीदृगित्यनुवेदितुं ।
व्यादिदेशास्य परितः खनने परिचारकान् ।। ४२ ।।

यावन्निचख्नुस्तत्तावल्लिङ्गमेव व्यदृश्यत ।
क्वचित्कृशं क्वचिस्थूलं क्वचित्समनया स्थितम् ।। ४३ ।।

नाचलच्चाल्यमानं च स्थिरं कांचनशैल्यवत् ।
ततोऽतिमात्रखनानान्निर्गताः पवनाशनाः ।। ४४ ।।

नानानेकमुखा दीर्घा महांतो विकटस्फटाः ।
संत्रस्ताः खनिकर्त्तारो गर्त्तमाशु व्यपूरयन् ।। ४५ ।।

इत्येतदद्भुततमदृष्टश्रुतपूर्वकं ।
पश्यन्नृपो दीर्घदर्शी चिंतयामास बुद्धिमान् ।। ४६ ।।

नन्वत्र जामदग्न्येन प्रार्थितो णगदीश्वरः ।
त्रिपुरारिः पुरा क्षेत्रं कृत्वैतदिरि नः श्रुतम् ।। ४७ ।।

नूनं कलियुगे चास्मिन्न प्रत्यक्षा दिवौकसः ।
तस्माल्लिङ्गस्वरूपेण स एवैष न संशयः ।। ४८ ।।

प्रस्तरे शोणितं क्वापि न हि दृष्टं न च श्रुतं ।
नूनमेनेन मूढानां दर्शितं ज्ञानहेतवे ।। ४९ ।।

अपि व्याडिमुनेरत्र बभूवाश्रममण्डलं ।
सोस्थापयत्पदे लिङ्गमित्युदन्तं च शुश्रुम ।। ५० ।।

इति निश्चित्य नृपतिः सद्भिः सह महामतिः ।
जनानाहैष गिरिशः स्वयंभूर्भगवानिति ।। ५१ ।।

यस्माद्वाडस्य सामीप्ये दृष्टो मस्करकुञ्जरः ।
तस्माद्वाडेश्वरो नाम्ना भवत्वेष जगद्गुरुः ।। ५२ ।।

इतीरयित्वा सुतरां प्रतीतः
प्रतीतमित्राभ्यनुमोदितः सः ।
धराधिराजः शितिकंधरस्य
प्रासादकृत्ये विदधे मनीषाम् ॥ ५३ ॥

॥ इति श्रीवाडेश्वयोदये महाकाव्ये विश्वनाथकृतौ
वाडेश्वरलिङ्गाविर्भावो नाम नवमः सर्गः ॥

— १० —

अथ विश्वंभराभर्ता सांकुराणो महायशाः ।
प्रासादकरणोद्युक्तस्त्रिक्रमं प्राह मंत्रिणम् ॥ १ ॥

इतिकर्त्तव्यतां सर्वां पश्य त्वमविलंबितः ।
त्वक्सारांश्छिधि सकलान्समा कुरु वसुंधराम् ॥ २ ॥

विशालां वडवाशालामुद्वासय समीपतः ।
मृत्स्नाभिः पूरय क्षोणीं जानुदघ्नां समंततः ॥ ३ ॥

सारद्रुजानि दारूणि पाषाणांश्च दृढान्बहून् ।
संभराशु सुधादींश्च संभारान्शिल्पिनस्तथा ॥ ४ ॥

इत्यादिश्याथ निश्चित्य मनसा वास्तुमेदिनीं ।
दैर्घ्यव्यायाममानाभ्यामियत्पदमितामिति ॥ ५ ॥

ततो नृपतिचूडोऽसौ गतः सायं स्वमंदिरं ।
कृतसायंतनविधिः सुप्तो पश्यदिदं किल ॥ ६ ॥

कश्चिद्दिगंबरो योगी शूळपाणिर्विभूतिभृत् ।
जटास्तडिन्निभा बिभ्रद्राजानमिदमब्रवीत् ॥ ७ ॥

यन्निश्चितं त्वया राजन् मानेन शिवसद्म तत् ।
यं द्रष्टा प्रथमं प्रातस्तत्पदप्रमितं कुरु ॥ ८ ॥

योगिनो वीतरागस्य मठमात्रमलं मम ।
भक्तस्य व्यर्थ आयास इतीव करुणावता ॥ ९ ॥

वाडेशेनेत्थमादिष्टः प्रबुद्धः पृथिवीपतिः ।
ददर्शाग्रे प्रथमतः स्थितं कंचन कुब्जकम् ॥ १० ॥

स वै गांगडको नाम्ना यवनो देवनोदितः ।
उपकार्यागतस्याधो गतो दृष्टिपथं बत ॥ ११ ॥

अथ राजा स्वप्नवृत्तं ज्ञात्वा दृष्ट्वा च वामनं ।
मेने देवकृतं धीमान् विमनाश्च बभूव ह ।। १२ ।।

क्वायं प्रासादकरणे महान्परिकरो मम ।
क्वेमे खल्वपदे ह्रस्वे भूमिमानार्थमाहिते ।। १३ ।।

आत्मारामस्य किं वास्य सद्मोदारं न रोचते ।
किं वा मे मंदभाग्यस्य नेहते हंत धूर्जटिः ।। १४ ।।

इति चिंतयतस्तस्य सभापालाः समागतः ।
श्रुत्वा राजमुखात्सर्वं विस्मिता विकृताश्च ते ।। १५ ।।

ततः स कुब्जको ज्ञात्वा वैकृतं तत्सहेतुकं ।
निर्णीय सात्विकं भावमिदं वचनमब्रवीत् ।। १६ ।।

मा राजन्विमना भूया वामनोऽपीशसद्मने ।
मिनोमि मेदिनीमिष्टां पश्य मे कौतुकं महत् ।। १७ ।।

इत्युक्त्वा चरणौ मध्ये तीक्ष्णक्षुरिकया स्वयं ।
विपाद्य द्विगुणीकृत्य दीर्घौ चक्रेऽतिनिष्ठुरम् ।। १८ ।।

देवालयस्य तां भूमिं यावदिष्टपदां मुदा ।
चक्राम गणयन्पद्भ्यां पुमांसाववलंब्य सः ।। १९ ।।

तस्मिन्वसुमयं वर्षं पपात नृपसत्तमात् ।
व्योम्नः पुष्पमयं सोऽपि पपात पृथिवीतले ।। २० ।।

स कालेनाल्पकेनैव कुब्जकः सत्ववत्तमः ।
सायुज्यं प्राप दुःप्रापं शंभोरपि महात्मभिः ।। २१ ।।

भूमिपालोऽथ तुष्टात्मा प्रारेभे सद्म शांभवं ।
बहुवित्तव्ययापेक्षी तक्षकैः कर्मकोविदैः ।। २२ ।।

अथो जयश्रीराणाख्यः सांकुराणसखा किल ।
राजा बुद्धिलदुर्गस्थो जाइलालात्मजो विभुः ।। २३ ।।

स प्रपर्याप्तदारूणि सारवंति महांति च ।
नौसाधनैः समानीय वाडेश्वरमुपस्थितः ।। २४ ।।

सांकुराणः समर्थोऽपि सुहृदस्तान्युपाददे ।
दारूणि देवसद्मार्थं यच्चान्यदुपकल्पितम् ।। २५ ।।

एवं संभृतसंभारः क्षितीशो बहुसाधनः ।
प्रासादं देवदेवस्य चक्रे विसृतसुंदरम् ।। २६ ।।

देहलीतोरणद्वारतुलास्तंभसमृद्धिमत् ।
विशिष्टशिल्पिकौशल्यं नानाचित्रमनोरमम् ॥ २७ ॥

सुविशालैः शिलापट्टैर्गर्भागारं व्यचीक्लपत् ।
मुखतो मुखशालां च विशालां विदधेऽद्भुताम् ॥ २८ ॥

प्राकारपरिवेषं च चकार बहुविस्तरं ।
चंडेशं नंदिकेशं च यथास्थानमयोजयत् ॥ २९ ॥

हनूमंतं विवस्वंतं विष्टरश्रवसं तथा ।
महिषासुरहंत्रीं च स्थापयामास पूर्वतः ॥ ॥ ३० ॥

अभिषेकादिसिध्यर्थं द्वावंधूनि चखान ह ।
पुष्पवाटं सुविपुलमालयांतिन्यरोपयत् ॥ ३१ ॥

पूजादीनां प्रवाहार्थं क्षेत्राणि विपुलान्यथ ।
उत्ससर्ज प्रजापाल आजीव्यांश्च महीरुहान् ॥ ३२ ॥

सचिवाश्च सभापाला राज्ञः सर्वे यथावसु ।
पूजोपकरणं सर्वं प्रददुर्जगदात्मने ॥ ३३ ॥

अन्येऽपि बहवो विप्राः क्षत्रिया वणिजोंऽघ्रिजाः ।
उपतस्थुर्महादेवं नानोपायनपाणयः ॥ ३४ ॥

कश्चिद्धातुमयान्नागान्कश्चिद्भूषाविशेषकान् ।
वादित्राणि विचित्राणि ददौ कश्चित्प्रदीपकान् ॥ ३५ ॥

कश्चिदारोपयामास चलपत्रं तदग्रतः ।
विशालवेदिकाबद्धं तुलसीमपरस्तथा ॥ ३६ ॥

संवेशदोलिकामन्यो दांतां रौक्मपरिच्छदां ।
इत्यादि बहवो भक्ता ददुर्देवाय भूरिशः ॥ ३७ ॥

शुशुभे भुवि वाडेशप्रासादो त्रिविधर्धिभिः ।
सुमेरुशैलशिखरे माहेंद्रमिव मंदिरम् ॥ ३८ ॥

प्रातरादित्रिकालेषु धूपार्तिक्यमहोत्सवः ।
ब्रह्मघोषोत्तरो यत्र जयवादोपलक्षितः ॥ ३९ ॥

भक्ता यत्र स्म गायंति कुर्वन्ति स्म प्रदक्षिणाः ।
नृत्यन्ति स्म नमन्ति स्म स्तुवन्ति स्माधुनापि तत् ॥ ४० ॥

सांकुराणनृपादीनां तेषां भवतामलात्मनाम् ।
प्रत्यब्दं यत्र कार्त्तिक्यां प्रार्थ्यंते ब्राह्मणैर्वराः ॥ ४१ ॥

सांकुराणस्य सायुज्यं शिवेनास्त्वथ तद्भुवां ।
सतां दीर्घायुरित्येतत्प्रकारकनिदर्शनाः ॥ ४२ ॥

सोऽयं वाडेश्वरो देवः सर्वेशो भक्तवत्सलः ।
भार्गवप्रार्थितः पूर्वं कलौ लिंगस्वरूपधृक् ॥ ४३ ॥

प्रत्यक्षो जामदग्न्यस्य निजरूपेण यः सदा ।
अन्येषां लिंगरूपेण बहुरूपी समस्तदृक् ॥ ४४ ॥

यः पापारण्यवह्निर्भवसलिलनिधौ मज्जतां पोतरूपो
शोकध्वांतप्रदीपः समभिहितफलप्रार्थनाकल्पवृक्षः ।
नानारोगद्रुदात्रं निरवधिकरुणारूपपीयूषपात्रं
रामक्षेत्रेऽब्धितीरे निवसति भगवानेष वाडेशदेवः ॥ ४५ ॥

॥ इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
वाडेश्वरालयवर्णनं नाम दशमः सर्गः ॥

— ११ —

वाडेशादथ पवमानदिग्विभागे
विक्षेपावधि विशिखस्य चोपकूले ।
वेलायां सलिलनिधेरुरुप्रभावं
रामेशाभिधमुडुराजचूडलिङ्गम् ॥ १ ॥

एतस्य स्वयमिह पंक्तिकंठकालं
श्रीरामः किल विपिने वसन्पुरास ।
स्वेच्छातो भृगुपतिभूमिगः सुतीरे
लिंगस्य प्रतिविदधेंबुधेः प्रतिष्ठाम् ॥ २ ॥

गोत्रायामिह खलु यत्र कुत्रचिद्य-
द्रामेशाभिधमुदितं महेशलिंगं ।
तन्नूनं दशरथनंदनेन पूर्वं
संक्लृप्तं स्वयमिति वर्णयंति सुज्ञाः ॥ ३ ॥

किं वाच्योऽद्य न महिमास्य भूरिभूते–
र्लिगस्य प्रथितगुणस्य चंद्रमौलेः ।
यद्रामः स्वयमकरोच्च रामभूमौ
तत्रापि प्रभवति तीर्थराजतीरे ॥ ४ ॥

वाडेशादथ हुतभुग्दिशाविभागे
विक्षेपावधि विशिखस्य सुप्रसिद्धं ।
सुक्षेत्रं परमपवित्रमेकमुर्व्यां
कंसारेर्जयति जनैरुपास्यमानम् ॥ ५ ॥

अत्रासीत्परममुनिः पुरा स कश्चि-
त्संतेपे परमतपो मुकुंदतुष्टयै ।
संतुष्टो हरिरकरोदनामयं त-
मेतस्मात्प्रथितमिदं पदं पृथिव्याम् ॥ ६ ॥

अथ घारोपनामार्यः केशवार्चा सुलक्षणां ।
पदेऽस्मिन्स्थापयामास ब्राह्मणः कल्पिते मठे ॥ ७ ॥

तस्माद्घारेमठो नाम्ना देवः प्रख्यातिमागतः ।
वितथप्रथिमा पृथ्व्यामपि चोक्तो गरामठः ॥ ८ ॥

गरामान्विषरोगान् यष्ठाति नाशयति प्रभुः ।
आर्त्तानुग्रहकृद्देवो गरामठ इतीर्यते ॥ ९ ॥

स एष दृश्यते चास्य महिमा लोकविश्रुतः ।
गरामठस्य देवस्य प्रपन्नार्त्यपहारिणः ॥ १० ॥

प्रपन्नैर्यस्य पादाब्जं पातकेभ्यः प्रमुच्यते ।
रोगेभ्यो दंदशूकेभ्यो वृश्चिकेभ्यश्च तत्क्षणात् ॥ ११ ॥

रामक्षेत्रमहो धन्यं यत्र घारेमठोऽमरः ।
मनुजा अपि ते धन्या ये भजन्ति गरामठम् ॥ १२ ॥

स देवदेवो भगवान्गरामठः
प्रसन्नपंकेरुहलोचनाननः ।
कौमोदकीपंकजशंखचक्रभृत्
पायादपायादखिलं जगत्रयम् ॥ १३ ॥

वाडेशदेवादथ दक्षिणस्यां
दिशि प्रसिद्धं भुवि योजनांतरे ।
पाथोनिधे रोधसि वेलणेशा-
भिधं सुधाधाम ललाम लिङ्गम् ॥ १४ ॥

क्षेत्रं तदुर्व्यां परमं पवित्रं
यत्र प्रभुर्दीव्यति वेलणेशः ।
यत्सिद्धपीठं प्रवदंति संतः
सिध्यंति यस्मिन्सपदीहितार्थाः ॥ १५ ॥

तदाख्यया भुवि ख्यातस्तद्ग्रामो वेलणेश्वरः ।
यत्र जागर्ति विश्वात्मा वरदो वेलणेश्वरः ॥ १६ ॥

शिवरात्रिमहे यत्र गूढदेभ्योऽखिलो जनः ।
अन्योऽपि नियतं यातीत्ययं पंथाः सनातनः ॥ १७ ॥

महिमानमहोऽस्य वर्णितुं
न हि शक्तिः खलु कस्यचिद्भुवि ।
गदिनोऽपधनाश्च ये जना
यमुपास्याथ भवंति शोभनाः ॥ १८ ॥

अथ वाडेश्वरात्क्रोशावधि शंकरभागतः ।
तारकेश्वरनामोच्चैर्वरीवर्त्ति सदाशिवः ॥ १९ ॥

प्रपन्नान् तारयत्येष रुग्दारिद्र्यचापमृत्युतः ।
तारकेश्वर इत्याख्या यथार्था सा ततोऽभवत् ॥ २० ॥

यः प्रार्थयेतामयसंप्रहारं
यश्चाभिवांछेत्सुखमत्युदारं ।
यो गंतुकामश्च भवाब्धिपारं
नमेत्स एनं नरमेकवारम् ॥ २१ ॥

देशकोणेऽथ वाडेशाद्योजने वायुभागतः ।
आस्ते श्रीटाळदेवाख्यः शंकरः शैलमूर्ध्दनि ॥ २२ ॥

तत्रोच्चकैस्तापकसेवितं वनं
रम्यं तपःसाधनमेकमुत्तमं ।
यस्मिन्मनः शाम्यति यत्र गोचरा
हरंति न क्षुन्न च तृट् प्रबाधते ॥ २३ ॥

स्त्रियो न तस्मिन्परिसंचरंति
योगीशशापादभिशंकमानाः ।
या योषितस्तत्पदमाव्रजेयु–
र्नश्येयुरक्षीणि बताशु तासाम् ॥ २४ ॥

तत्र चोदाहरंत्येकं वृत्तं विस्मयकारकं ।
टालदेवस्य चरितं साक्षाद्दृष्टं पुराभवैः ॥ २५ ॥

पुरा माघस्य पंचम्यां तद्देवस्य महोत्सवे ।
भक्ताः समेताः सामंता जनाः पाथेयभोजनाः ॥ २६ ॥

तेषु केचिद्भुक्तवंतः केचिदासन्नभोजनाः ।
कृतार्धजेमनाः केचिन्मध्ये दिनगतं रवौ ॥ २७ ॥

समेतजनबाहुल्यान्निपानाल्पतयापि च ।
निर्वीतं शंबरं तत्र पिपासापीडिता जनाः ॥ २८ ॥

श्रीटालदेव देवेश प्रपन्नार्त्तिहर प्रभो ।
जलं देहि जलं देहीत्युच्चैश्चुक्रुशुरातुराः ॥ २९ ॥

बकुलद्रुस्तदा तुंगो देवद्वारि स्थितो महान् ।
मूलदेशे बाढरवं पुस्फोट शतपर्ववत् ॥ ३० ॥

वारां प्रवाहः सुमहांस्तस्माद्यविरभूत्पुरः ।
स्नाताः पीताः समाचांता विश्रांतास्तेन ते जनाः ॥ ३१ ॥

मुहूर्तात्सलिलप्रायं काननं तद्विधाय सः ।
तिरो बभूव तोयौघस्तदद्भुतमिवाभवत् ॥ ३२ ॥

स देवदेवो भगवान्परेशः
श्रीटालदेवो जगदेकदेवः ।
भूदेवदेवैरुपबद्धसेवो
जागर्त्ति योगी खलु वामदेवः ॥ ३३ ॥

अथ वाडेश्वरात्प्राच्यां दिशि योजनपंचके ।
उपशल्ये श्वभ्रगृहे बहिश्चित्तपपत्तनात् ॥ ३४ ॥

भगवान्कृत्तिकापुत्रो जामदग्न्यानुरागतः ।
स महात्मा महसि नो वरीवर्त्ति यदृच्छया ॥ ३५ ॥

कार्त्तिक्यां कृत्तिकायोगे दृष्टो यः शिवयोगतः ।
सप्तजन्मसुविप्रत्वं धनाढ्यत्वं च यच्छति ॥ ३६ ॥

तथा भगवती देवी वरदा विंध्यवासिनी ।
भक्तानुग्रहकामा सा स्थिता लोकैरुपासिता ॥ ३७ ॥

गूढदेशेऽत्र मुख्यानि देवतायतनानि तु ।
वाडेश्वरप्रसंगेन प्रोक्तान्येतानि तानि मे ॥ ३८ ॥

गूढदेशाद्दक्षिणतो ये देशाः पाटनादयः ।
तथैवोत्तरतो देशाः खेटाद्या विद्युताः परं ।। ३९ ।।

तेषु क्षेत्राणि चित्राणि देवतायतनानि च ।
प्राधान्येन मुनेः क्षेत्रे वर्णये तानि कानिचित् ।। ४० ।।

भगवान् संगमे नद्योर्विख्यातः संगमेश्वरः ।
यन्नाम्ना विश्रुतं क्षेत्रं तत्त्रैलोक्यमनोहरम् ।। ४१ ।।

यत्र सोमेशसप्तेशकर्णेशादीन्यनेकशः ।
लिङ्गानि प्रतिमा रम्या विष्णवादीनां च भूरिशः ।। ४२ ।।

यत्र प्रासादरचना दृषन्मय्यतिमानुषी ।
यद्वर्णयंति विद्वांसो वाराणस्युपमानतः ।। ४३ ।।

अथोदरे वारिनिधेर्धरणीधरमूर्धनि ।
करहाटेश्वरो यत्र गंगाकोलाहलोद्गमाः ।। ४४ ।।

सोमेशः सौबलग्रामे ततो यतिपडिकांतरे ।
शिवरात्रौ प्ररोहन्ति मालूराः स्फुटमद्भुताः ।। ४५ ।।

कूटकेश्वरनामाथो ग्रामे तन्नामके विभुः ।
अनारतं वरीवर्ति तीरे क्षीरपयोनिधेः ।। ४६ ।।

तत्र सायांत्रिकः कश्चिन्मज्जन्नावि विपद्गतः ।
नौकाबलिं पुरस्कृत्य हृदैनं शरणं गतः ।। ४७ ।।

यः कश्चिदत्र देवः स्याद्यदि दीनदयाकरः ।
स उद्धातु मामार्त्तं मज्जंतं सागरोदरे ।। ४८ ।।

इत्थं विलपमानं तं दयालुः कूटकेश्वरः ।
स तरिं तारयामास तरुकूटगतस्तटे ।। ४९ ।।

अथ त्रातः स तरणिस्तेन दीनदयालुना ।
सायांत्रिको धनं सर्वं सद्मार्थे समकल्पयत् ।। ५० ।।

कृत्वा प्रासादरचनां सोऽन्ते जिगमिषुः पदं ।
जहौ तनुं व्रतकृशां तुंगौके भृगुपाततः ।। ५१ ।।

तस्येशभक्तिसामर्थ्यपरिविध्वंसितेन सः ।
अगारमस्ति देवाग्रे मुक्तस्येशाज्ञया कृतम् ।। ५२ ।।

तत्परं पावनं क्षेत्रं प्रार्थ्यते भुवि मानवैः ।
मनोभिलषितार्थानां यत्र सिद्धिरदूरगा ।। ५३ ।।

अथ गोमंतकं नाम क्षेत्रं यत्कथितं पुरा ।
तदंतिके पंचगंगा नाम तीर्थं महानदी ॥ ५४ ॥

अनाहतध्वनिर्यस्यां यस्यां पातालसंस्थितः ।
हृदकेशः स्वनिर्माल्यं प्रत्यब्दं यच्छति स्फुटम् ॥ ५५ ॥

सप्तकोटीश्वरो देवस्तत्सांनिध्येन वर्त्तते ।
सप्तानामपि लोकानां संप्रार्थ्यः सर्वकामदः ॥ ५६ ॥

ततः परं परं क्षेत्रं प्रख्यातं भार्गवक्षितौ ।
यस्मिन् शिवेश्वरो नाम देवो भक्तशिवप्रदः ॥ ५७ ॥

गोकर्णमालयं शंभोस्ततः भोधिरोधसि ।
जरीजृंभत्कोटितीर्थं कोटितीर्थाधिकं महत् ॥ ५८ ॥

सहस्रास्योऽपि भगवाननंतो यस्य वर्णने ।
न क्षमस्तत्र मादृक्षः को वराको नरोऽल्पधीः ॥५९॥

तत्र आकेरलं देशं प्रथितानि पृथूनि च ।
सुब्रह्मण्यादीनि परं पुण्यान्यायतनान्यलम् ॥६०॥

इति दक्षिणतः क्षेत्रे क्षेत्राण्युक्तानि कानि चित् ।
गूढदेशादथोदीच्यां वच्मि मुख्यानि यानि तु ॥६१॥

इति श्री वाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
रामक्षेत्रांतर्गतक्षेत्र-वर्णनो नामैकादशः सर्गः ॥

— १२ —

अथ दाल्भ्यं नाम पुरं ब्रह्मांडोदरमंडनं ।
यज्जगत्पावनीसिंधुक्षारसागरसंगमे ॥ १ ॥

यत्र दाल्भ्येश्वरो नाम भगवानभयप्रदः ।
दाल्भ्येन स्थापितः पूर्वं मुनिना स किलाश्रमे ॥ २ ॥

तेन चाराधिता देवी गंगा त्रिपथगामिनी ।
माघे स्नानाय चाद्यापि याति सत्यसरस्वती ॥ ३ ॥

चलदलतरुमूले चारुकासारकूले
विहितविमलतुंढ्यां दाल्भ्यपस्त्यात्पुरस्तात् ।
त्रिजगदभयदात्री लीलया पुण्यपात्री
दुरितदरणधन्या जह्नुकन्याविरस्ति ॥ ४ ॥

अथ यथाविभवं भवभंजिनी
पयसि पूजनपूर्वकमाप्लवम् ।
सुविदधद्विदधीत यथाक्रमं
द्विदशनामभिरर्घ्यविधिं बुधः ॥ ५ ॥

वैकुंठालयपदविस्वरीश सिंधो
सन्मुक्तावलि लतिकेधरायुवत्याः ।
आनंदोदयकरिनंदिनीति संज्ञे
श्रीगंगे सनति गृहाण सन्ममार्ध्यम् ॥ ६ ॥

निःशेषं हरसि मलं भजज्जनानां
संलिप्ता भवसि न जातु पातकैस्तैः ।
एतस्मात्तव नलिनीति नामधेयं
श्रीगंगे सनति गृहाण सन्ममार्ध्यम् ॥ ७ ॥

मातस्त्वं यदपि च भीष्मसूरभीष्मा
कांत्यासि द्युनदि सिताऽसितायुतापि ।
रक्षोभिर्न परिहृता च नाम सीता श्री० ॥ ८ ॥

ब्रह्मांडप्रविततभूरिपुण्यगंधै–
राकृष्टत्रिभुवनसज्जनद्विरेफे ।
भावोष्मप्रशमिनि मालतीसमाह्वे श्री० ॥ ९ ॥

त्वं कंठीरवकठिनाऽघकुंभिभंगे
दीनानुग्रहकरणे नितांतमृद्वी ।
माहात्म्यं तव विविधं महापगे भोः
श्रीगंगे सनति गृहाण सन्ममार्ध्यम् ॥ १० ॥

त्वामाहुर्भगवति विष्णुपादपद्म–
संभूतामिति मुनयो महानुभावाः ।
तद्धतेन्धकपरिमर्दनः कपर्दे श्री० ॥ ११ ॥

नीरांगे तटगखगे स्मरारिसंगे
दीर्णांगे बिलशयगे चलत्तरंगे ।
सद्योगे जलनिधिगे कृतप्रयागे श्री० ॥ १२ ॥

पाताले धरणितले च देवलोके
लोकेशाहितकलशादुपेत्य मातः ।
पासि त्वं त्रिकपथगामिनि त्रिलोकीं श्री० ॥ १३ ॥

पूर्वेषामघहरणाय मोक्षदां का
वानिन्ये सुरसदनाद्भगीरथस्त्वां
तद्भागीरथि जननि त्वमन्वितार्था श्री० ।। १४ ।।

गीर्वाणी तनुचितचंदनेश्च वेणी
संतानैः कुचघुसृणैर्जलावगाहे ।
उन्मृष्टैर्भगवति भोगवत्यभीक्ष्णं श्री० ।। १५ ।।

त्वन्नामस्मृतिरवलोकनंकपानं
स्नानं चेत्यमृतदमेकमेकमेषां ।
क्षोणीभृद्दुहितृसपत्नि जाह्नवीशे श्री ।। १६ ।।

रोगद्रुस्वधितिरघाटवी कृशानुः
संसारांघ्रितरिरभीष्टकामधेनुः ।
ख्यातासि त्रिदशपदात्परेश्वरीति
श्रीगंगे सनति गृहाण सन्ममार्घ्यम् ।। १७ ।।

नमस्तेऽस्तु गंगेऽभिषिक्तेशलिङ्गे
त्वदन्या सुधन्या वदान्या न मान्या ।
अतस्त्वां शरण्ये शिवे जह्नुकन्ये
प्रपद्येऽनवद्येऽभिवंद्येऽतिहृद्ये ।। १८ ।।

अर्घ्यसमर्पणपूर्वकमेवं
विष्णुपदी नदिकाकमले यः ।
स्नाति स याति पदं यदभीष्टं
पीतपटीककटीतकस्य ।। १९ ।।

सावित्री चाथ गायत्री. सरितौ सहचपर्वतात् ।
समेत्य सागरं याते महाबलशिवोद्गते ।। २० ।।

मिथः शापात्सरिद्भावं गते द्रुहिणयोषितौ ।
स वादे धवसंपक ज्यैष्ठचकानिष्ठचकल्कने ।। २१ ।।

तयोः सागरसंबंधे ब्रह्मविष्णुमहेश्वराः ।
गिरिरूपास्त्रयस्तेषां मूले कूलेंतरंबुधेः ।। २२ ।।

पावनं सर्वलोकानां मुक्तिदं तीर्थमुत्तमं ।
मुक्तिदं सेवितं शश्वच्छुक्लंनाम सुविश्रुतम् ।। २३ ।।

पंककालिमनिर्मुक्त्या शुक्लत्वं समवाप्यते ।
स्नानादिकर्मणा यत्र तेन शुक्लाख्यतां गतम् ।। २४ ।।

यत्र मुक्तिः पिशाचानां यत्र पापामयक्षयः ।
अप्रजानां प्रजा यत्र पृथिव्यां प्रथितं ततः ।। २५ ।।

आस्ते तत्र जगन्नाथो देवो हरिहरेश्वरः ।
भगवान्भैरवश्चास्ते पिशाचपरिमोचकः ।। २६ ।।

पर्वताः कांचनमया त्रयस्ते देवतात्मकाः ।
मृन्मया परिदृश्यन्ते चर्मदृग्भिः कलौ युगे ।। २७ ।।

अत्र चोदाहरन्त्येकां कथां चित्रां पुराविदः ।
ग्राव्णां हिरण्मयत्वस्य प्रत्ययप्रतिपादिनीम् ।। २८ ।।

पुरा वाराणशीपुर्यां मुक्तिमंडपसंसदि ।
उपविष्टा ब्रह्मविदः पुराणश्रवणे रताः ।। २९ ।।

तत्र सूतमुखाच्छ्रुत्वा गिरीन्स्वर्णमयानिमान् ।
विश्रंभो नाभवत्तेषां दृष्टमृन्मयभूभृताम् ।। ३० ।।

अथ मीमांसमानास्ते मिथः संदिग्धबुद्धयः ।
प्रामाण्यं निगमस्याहो प्रत्यक्षस्योत वा द्वयोः ।। ३१ ।।

लेखकस्योत वा दोषः स्वस्य तिद्यस्य वा बत ।
इति तं निर्णयं कर्तुं कश्चित्तैः प्रेषितो द्विजः ।। ३२ ।।

स तत्र गत्वा शैलेभ्यो मुष्टिमुष्टिमितां मृदम् ।
गृहीत्वागात्पुनः काशीं सभामध्ये व्यदर्शयत् ।। ३३ ।।

संतः संजातविश्वासा दृष्ट्वा मृत्सा हिरण्मयी ।
अथोवाच मृदाहर्ता विस्मितांस्तान्सुविस्मितः ।। ३४ ।।

अहो चित्रमहो चित्रं सभ्याः श्रृणुत सादरं ।
मृन्मयेभ्यस्तदद्रिभ्यो मृदेवैषा मया हृता ।। ३५ ।।

वाराणश्या बहिर्यावदपश्यं प्राकृतां मृदं ।
इहेदानीमहो चित्रं दृश्यतेमृद्धिरण्मयी ।। ३६ ।।

ततो विश्रब्धमनसः संतो मंदाक्षलक्षणाः ।
संजातप्रत्यया वेदे प्रणेमुर्ब्रह्म शाश्वतम् ।। ३७ ।।

त इमे पर्वताः पुण्याः प्रथिताः पापनाशनाः ।
प्रादक्षिण्यविधिर्येषामेकः कृच्छ्राघनिष्क्रयः ।। ३८ ।।

तत्परं पावनं धन्यं क्षेत्रं हरिहरालयं ।
शुक्लं तीर्थोत्तमं यत्र यत्र शैला हिरण्मयाः ।। ३९ ।।

पुण्याद्धरिहरक्षेत्रात्पांसवोऽप्यनिलेरिताः ।
विप्रकृष्टेऽप्युपस्पृष्टा निःपुनंत्यपि पापिनम् ॥ ४० ॥

जयति जयति नित्यं शुक्लतीर्थं सुतीर्थं
भवति सपदि यस्मिन्मज्जतां सज्जनानाम् ।
दुरिततिमिरनाशः पुण्यतत्वप्रकाशः
सुरवरपदवासः संसृतेः संनिरासः ॥ ४१ ॥

चंचत्पश्चिमनीरराशिविवलत्कल्लोलमालाकुलं
क्षुभ्यद्भीमगभीरनीरविलसन्नक्रोरुचक्राकुलम् ।
त्वंगत्तुंगतरंगताडितदरीदह्रोद्भवद्भीषण-
स्वानं स्वाश्चितमुक्तिदातृ जयति श्रीशुक्लतीर्थं महत् ॥ ४२ ॥

यत्र क्षुभ्यज्जलनिधिवलत्तुंगभंगव्रजानां
नाकस्पर्द्धि क्षितिधरबृहद्वप्रघोरप्रघातैः ।
तारा मार्गोच्छलित सलिला वाङ्निपातैरनेकै-
स्तत्रत्यानां भवति वियतः संभ्रमो नित्यवृष्टेः ॥ ४३ ॥

भीमभीषणगदाविदारित
क्ष्माधरोदरदरीसमर्थिता ।
यत्प्रयाणसरणिर्यमेभभू
भंगिका तदिति तीर्थमीक्ष्यते ॥ ४४ ॥

शश्वद्यस्मिन्नमररमणीचारुवक्षोजमृष्टो-
द्भ्रष्टैरिष्टा भवति समये कुंकुमैरारुणी भाः ।
अंत श्यामातिलतुलसिकाबिल्वपत्रैर्मुनीनां
शौक्तं पाथः प्रथित महिमस्ताः सदा गोचरा मे ॥ ४५ ॥

शौक्लं तोयं सदा ध्येयं वंदनीयं महात्मनां ।
अप्राप्यमपि देवानां स्नानार्थं सर्वदास्तु मे ॥ ४६ ॥

यत्र प्रपन्नाः प्रतरंति दुर्गतिं
तीर्णाः पुनः स्वर्गगतिं लभन्ते ।
लब्धा भवाब्धौ न पुना रमंते
तच्छुक्लतीर्थं शरणं ममास्तु ॥ ४७ ॥

हरिहरगिरिमूले क्षारपाथोधिकूले
शमितशमलसार्धं पावनं शुक्लतीर्थम् ।
भजति सकृदपीह प्राप्तपुण्योच्चयो यो
व्रजति पदमभीष्टं शांभवं वैष्णवं वा ॥ ४८ ॥

अथान्यः सागराभ्याशे चंपपुर्यां सुविश्रुतः ।
देवो रामेश्वरो नाम देवोऽथ च्यवनेश्वरः ।। ४९ ।।

सरो धुतसमुद्राख्यं प्रदेशे तत्र वर्त्तते ।
प्रथितं पावनं पृथ्व्यां नानानलिनशोभितम् ।। ५० ।।

यस्मिन्हैमानि पद्मानि प्रफुल्लंति किल स्म ह ।
दृष्टश्च प्रत्ययस्तेषां काश्यां हरिहराद्रिवत् ।। ५१ ।।

अथो कनकनामाद्रिरन्वर्थाख्यस्तदूर्ध्वतः ।
कनकेश्वरनामास्ते भगवानिष्टकामदः ।। ५२ ।।

एवं क्षेत्राणि चित्राणि तीर्थानि प्रथितानि च ।
प्राधान्येन मुनेः क्षेत्रे वर्णितानि यथाक्रमम् ।। ५३ ।।

अन्यान्यपि विचित्राणि क्षेत्रेऽस्मिन्कुत्र कुत्र चित् ।
वर्षास्वपि जलं तप्तमविदासि निपानगम् ।। ५४ ।।

क्वचिदाविर्भवत्यार्या देवी निर्जरनिम्नगा ।
क्वचिद्दाक्षायणी देवी क्वचिद्देवो गजाननः ।। ५५ ।।

विष्णोराकृतयः पुण्याः पुण्यक्षेत्रेषु विश्रुताः ।
शंभोश्च तत्तत्स्थानेषु तत्तद्भक्तैरुपासिताः ।। ५६ ।।

एषु वाडेश्वरो मुख्यो मालामध्यमणिर्यथा ।
उपास्यमानः सकलैः सर्वकामफलप्रदः ।। ५७ ।।

स्फूर्जच्चंद्रकलाललामविलसद्भालं त्रिलोकीगुरुं
कोटीं द्युतिगंजिमंजिममहाकायं कृपासागरं ।
जृंभन्निर्जरमौलिरत्नविसरत्रिणमंजरीपंजरी
भूतांघ्रि वरदं भजध्वमभयं वाडेश्वरं भो जनाः ।। ५८ ।।

।। इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
रामक्षेत्रवर्णनं नाम द्वादशः सर्गः ।।

– १३ –

अथैकः श्रीधरो नाम ब्राह्मणः सर्वशास्त्रवित् ।
वशीकृतपिशाचेशः साधको योगसिद्धिमान् ।। १ ।।

धनी बहुजनो विद्वान्वदान्यो राजसंमतः ।
वाडेश्वरमुपस्थाय राजानं समुपस्थितः ।। २ ।।

स राज्ञा पूजितो हृष्ट उपविष्टः शुभासने ।
पृष्टागमनहेतुस्तमवदद्वदतां वरः ॥ ३ ॥

राजन् ग्राममहं स्रष्टुमिच्छामि विषये तव ।
वाडेसस्याश्रयेणेह क्षारसागररोधसि ॥ ४ ॥

स्रक्ष्यमाणे च तद्ग्रामे पंचविंशतिवार्षिकः ।
जन्मतो न बलिर्देयो भूपायाथ तदूर्ध्वतः ॥ ५ ॥

उत्पन्नदशमो भागः प्रजानामेव केवलं ।
शिष्टस्य षष्ठो भागस्ते प्रजापालस्य सद्बलिः ॥ ६ ॥

राशेर्भूदेवदेवानामग्रहारप्रकल्पना ।
यावदिष्टं मम विभो ग्रामं स्रक्ष्यामि शास्त्रतः ॥ ७ ॥

एवं यदि महाराज मन्यसे मन्त्रिसम्मतं ।
स्वमुद्राचिह्निते पत्रे विलिख्यार्थं प्रयच्छ मे ॥ ८ ॥

इत्युक्तो नृपतिः सर्वं तत्तथा कृतवान्किल ।
तमर्हयित्वा तुष्टात्मा बहुमानपुरःसरम् ॥ ९ ॥

अथानुकूले दिवसे श्रीधरो बद्धसाधनः ।
इष्टदेवान्समाराध्य प्रारेभे ग्रामनिर्मितिम् ॥ १० ॥

दक्षिणोत्तरयोर्नद्यावुभे सागरगे तयोः ।
मध्येऽम्बुधितटे दैर्घ्यात्क्रोशमानमवागुदक् ॥ ११ ॥

वीरुगुल्मद्रुमांश्छित्वा समुत्पाद्य च तज्जटाः ।
संस्कृतायां क्षितौ चक्रे ग्रामं शास्त्रोक्तमार्गतः ॥ १२ ॥

रोपयामास कदलीस्ताम्बूलीश्च सहस्रशः ।
क्रमुकान्नारिकेलांश्च रसालान्पनसांस्तथा ॥ १३ ॥

इंगुदीप्रमुखांश्चान्यान्बहूनाजीव्यपादपान् ।
दाडिमीमातुलिंगीश्च निम्बूंश्च प्रत्यरोपयत् ॥ १४ ॥

पिशाचैः खनयामास तत्सेकार्थाय दीर्घिकाः ।
जलयंत्राणि चित्राणि तासु चक्रेऽतिकोविदः ॥ १५ ॥

नियता यत्र काष्ठानां नवाशीतिरनेकधा ।
स्रग्धानियतकाष्ठान्या प्रत्येकं शिल्पिकल्पिता ॥ १६ ॥

चक्री न विष्णुर्वृषभोह्यमानो
हरो न माली विषयाहितो न ।
भ्रमन्न वायुर्जलदो न मेघो
वनस्पतिप्राणनकृन्न सोमः ॥ १७ ॥

यस्य पुंनाम लोकेऽस्मिन् रहट्ट इति विश्रुतं ।
कालचक्रश्च दृष्टान्तं कवयो यं प्रचक्षते ।। १८ ।।

एवंविधैर्भूरियंत्रैरुद्धृतैर्वापिकाजलैः ।
सिषेच वापिकाः कृत्स्नाः संपन्नद्रुमवीरुधः ।। १९ ।।

चक्रे दलद्वयं चास्य ग्रामस्य स सृजन् सुधीः ।
मध्येऽवसाय यत्रास्ते रामेशः सागरान्तिके ।। २० ।।

आनीय चित्तपान्विप्रान् याज्ञिकान्वेदपारगान् ।
यथाविभागं वाटीषु स्थापयामास सद्मसु ।। २१ ।।

ग्रामस्योपान्तयोरन्ते स्थापयामास शास्त्रतः ।
क्षेत्रपालं दक्षिणत उदीच्यां वरदाम्बिकाम् ।। २२ ।।

यस्याः श्रीवरदाम्बाया महिमैष परिस्फुटः ।
महावात्यापि यद्दीपं नात्येत्यपि न संवृतम् ।। २३ ।।

दुर्गामस्थापयन्नैजां देवीमाराध्यदेवतां ।
पूजादिसिद्धये चास्मै ददौ क्षेत्राणि भूरिशः ।। २४ ।।

प्रत्यब्दं वार्षिके यस्या नवरात्रे महोत्सवः ।
शारदे च महापूजा जपहोमान्नतर्पणैः ।। २५ ।।

श्रीमद्वाडेशरामेश क्षेत्रपाणां च भागशः ।
गरामठस्य देव्याश्च क्षेत्राणि समकल्पयत् ।। २६ ।।

ब्राह्मणानां च विदुषामग्रहारानकल्पयत् ।
क्षेत्राणि सुखकृष्याणि सध्रीचीनाश्च वाटिकाः ।। २७ ।।

गवामेकत्रसंगत्यै स्थानानि समकल्पयत् ।
कल्पयामास विपुलां बल्लवेभ्यश्च जीविकाम् ।। २८ ।।

गवां कण्डूयनार्थाय ग्रामे गोष्ठेषु चाध्वसु ।
स्थाने स्थाने दृढस्थाणून्सुस्थिरानध्यरोपयत् ।। २९ ।।

स्थाने स्थाने जलद्रोणीः कूपेष्वाधाय यन्त्रिषु ।
सप्रवाहद्रुषु गवां विदधे विविधाः प्रपाः ।। ३० ।।

नानाप्रकारकैः शिल्पैः संभजद्भ्यो द्विजन्मनः ।
कुलालादिकशूद्रेभ्यः क्षेत्राणि समचीक्लृपत् ।। ३१ ।।

यद्यत्कर्म विगर्ह्यं सदावश्यकमपेक्षितम् ।
तत्प्रचारप्रसिद्ध्यर्थं क्षेत्राण्युदसृजत्सुवित् ।। ३२ ।।

यत्र रामेश्वरो देवो ग्राममध्येऽब्धिरोधसि ।
उभयोर्भागयोस्तत्र श्मशानं विदधे धिया ॥ ३३ ॥

रामेणारोपितो ह्येष रुद्रस्तीर्थालये यतः ।
अपि पापकृतामत्र मुक्तिरेव न संशयः ॥ ३४ ॥

शंपाद्यैरपमृतिहेतुभिर्मृता ये
पापिष्ठाश्चरममखेन वा विहीनाः ।
तेऽप्यस्मिन्दहनविधानमात्रयोगा–
द्रामेशाधिकृतपदे भवन्ति मुक्ताः ॥ ३५ ॥

अथैकदा ग्रामगुरुः श्रीधरो बुद्धिमत्तरः ।
रामं क्षेत्रस्य कर्तारमुपस्थातुं गतः किल ॥ ३६ ॥

उपस्थायाथ तं तावद्याति स्माध्वनि सत्वरः ।
ताम्रा नाम नदी भीमा स्फीता प्रावृष्यवर्तत ॥ ३७ ॥

तां तर्तुकामः शिरसि पाषाणं व्यदधात्कृती ।
अथोत्तीर्योपनिक्षिप्ते पश्यदस्त्रं तदश्मनि ॥ ३८ ॥

भैरवस्य प्रतिकृतिं ज्ञात्वा तां ज्ञानचक्षुषा ।
हृष्ट आदाय चागत्य ग्राममध्येऽध्यरोपयत् ॥ ३९ ॥

भार्यार्थेऽकल्पयच्चास्य तिस्रो दारुणदेवताः ।
वागीश्वरी वरा या सुसाध्वी भक्तानुकांक्षिणी ॥ ४० ॥

ग्रामस्य रक्षणे यत्ता भैरवेण सहाधुना ।
दृश्यते देवता शान्ता सर्वलोकैरुपासिता ॥ ४१ ॥

अथ ग्रामस्य कल्याणसिद्धये शास्त्रतत्त्ववित् ।
विदधे भावुकादेवीं पूर्वार्धान्ते यथाविधि ॥ ४२ ॥

तदुत्सवप्रवाहार्थं सुक्षेत्रं प्रतिपाद्य च ।
कर्म चास्याः कुलालेषु स्वर्णकारेषु चाभ्यधात् ॥ ४३ ॥

तत्रैव स्थापयामास गणेशं प्रत्यगाननम् ।
यं सिद्धपीठमित्याहुर्यत्र सिद्धयति हृच्छयः ॥ ४४ ॥

दुर्गायाश्च पुरश्चक्रे धर्मस्तम्भं तपोबलात् ।
निःप्रमाणविवादेषु दिव्यदानाय वादिनाम् ॥ ४५ ॥

यदन्यद्ग्रामकर्मोच्चैर्विहितं शास्त्रमार्गतः ।
दृश्यन्तेऽत्राभवत्पूर्वं राज्ञो राजिस्सुदारुणः ॥ ४६ ॥

ये तत्र निहता वीरा विनिखाता रणक्षितौ ।
तेऽमी ग्रामस्य मध्यस्था दृश्यन्तेऽश्मसु चित्रिताः ॥ ४७ ॥

मनोभिलषितानर्थान्ददति प्रार्थिता यतः ।
तेन देवत्वमापन्नाः पूज्यन्ते कतिचिज्जनैः ॥ ४८ ॥

देवानां ब्राह्मणां च या या वृत्तिः प्रकल्पिता ।
तस्यां तेनाभिविहितमेतदद्भुतशासनं ॥ ४९ ॥

चन्द्रार्कावधिकामेतां वृत्तिं योऽपहरेत्खलः ।
तन्मातरि खरो ह्येष इत्थं शपथदृष्टये ॥ ५० ॥

खरसंसृष्टसुरतनारीपुत्रिकयान्वितात् ।
चन्द्रार्काङ्कशिलापट्टान्वृत्तिस्थानेष्वरोपयत् ॥ ५१ ॥

एवमेनं महाग्रामं निर्माय विधिना बुधः ।
मर्यादामकरोदस्मिन्निमां नृपमतेऽसिः ॥ ५२ ॥

द्विजेतरे बहिर्ग्रामाद्दूरे सन्त्विह तेषु च ।
शूराः शस्त्रधरा ये ते सन्तु ग्रामान्तयोर्बहिः ॥ ५३ ॥

पन्थानोऽत्र त्रयः सन्तु मध्ये ग्रामं द्विजन्मनां ।
शूद्रादीनां बहिर्ग्रामात्सामान्यश्चाब्धिरोधसि ॥ ५४ ॥

ग्राममध्ये तु नामेध्यमाहार्यं पादजैः क्वचित् ।
केवलं द्विजशुश्रूषा मात्रोचित गतागतैः ॥ ५५ ॥

स्थातव्यं नात्र यवनैर्यदि स्थास्यन्ति कालतः ।
गोवधो न विधेयस्तैरिहेत्याद्युरुशासनम् ॥ ५६ ॥

आनुपूर्व्याच्च सकलं ग्रामनिर्मितिशासनं ।
व्यलिखद्राजमुद्राङ्कताम्रपट्टेषु सर्वशः ॥ ५७ ॥

आगामिभूमिपालानां परिज्ञानाय बुद्धिमान् ।
सुगुप्तांस्ताम्रपट्टांस्तान्प्रज्ञातान्निचखान ह ॥ ५८ ॥

ग्रामस्य नाम विदधे गुहागार इति स्फुटं ।
यन्निर्मितो गुहारण्ये शिवपुत्रस्य वाख्यया ॥ ५९ ॥

पितरावववतः पुत्रं भृशं स्नेहाद्यथा तथा ।
दुर्गावाडेश्वरौ पुत्रं ग्रामं पालयतामिति ॥ ६० ॥

अत एवोत्तरार्धेऽस्य ग्रामस्य स्थापिताम्बिका ।
आद्ये वाडेश आस्तेऽसौ त्राणायोभयभागयोः ॥ ६१ ॥

एवं विरचितो ग्रामो गुहो नाम महात्मना ।
वीरुतद्रुमौषधिफलैरलमासीदनेहसी ॥ ६२ ॥

राजा तु पालयामास कर्षकाणां करादिकं ।
यथाप्रतिज्ञं धर्मात्मा ततो ववृधिरे प्रजाः ॥ ६३ ॥

समृद्धाः सकला लोकाः सर्वदा सन्महोत्सवाः ।
सुखाग्रहारभोज्येषु द्विजेष्वासन्नधीतयः ॥ ६४ ॥

ईजुर्द्विजाः क्रतुशतैरन्नछत्रैश्च केचन ।
चक्रुः केचित्प्रदानानि केचिदस्थापयन्सुरान् ॥ ६५ ॥

केचिज्जीर्णानि देवानामालयानि तनूरपि ।
नवीचक्रुर्धर्मपरा इत्थमासन्महा महाः ॥ ६६ ॥

तस्य द्वौ भ्रातरावास्तां गंगाधरदिवाकरौ ।
ताभ्यां मुरुवडग्रामदीपग्रामौ विनिर्मितौ ॥ ६७ ॥

गुहाग्रामो यथा ह्येष श्रीधरेण विनिर्मितः ।
तथैव तावब्धितीरे सुप्रसिद्धावुदग्दिशि ॥ ६८ ॥

स एष रुचिरो ग्रामो गुहो नाम महोदयः ।
यत्र वाडेश्वरो देवो यत्र देवो गरामठः ॥ ६९ ॥

यत्र नित्यं भृगुपतीरामो वाडेश्वरप्रियः ।
वाडेशदर्शनार्थाय गूढो याति न संशयः ॥ ७० ॥

यत्रार्या ब्राह्मणाः पुण्याश्चित्तपा भार्गवप्रियाः ।
यज्ञशीलाः कर्मनिष्ठा वेदशास्त्रपरायणाः ॥ ७१ ॥

भुक्तिदो यत्र वाडेशो रामेशो यत्र मुक्तिदः ।
दुर्गा विजयदा यत्र यत्रार्तिघ्नो गरामठः ॥ ७२ ॥

गुहग्रामाभिधमिदं क्षेत्रं पापविनाशम् ।
पञ्चनारायणा यत्र यत्र तीर्थश्रियोऽम्बुधिः ॥ ७३ ॥

रामक्षेत्रे नृणां वासो गूढदेशे विशेषतः ।
तत्रापि च गुहग्रामे नाल्पस्य तपसः फलम् ॥ ७४ ॥

यथा देवेषु गोविन्दो यथा सिन्धुषु जाह्नवी ।
रामक्षेत्रमिदं श्रेष्ठं तथा क्षेत्रेषु मुक्तिदम् ॥ ७५ ॥

यथा वाडेश्वरो देवः क्षेत्रेषु प्रवरो विभुः ।
तथा ग्रामेषु सर्वेषु गुहागारोऽयमुत्तमः ॥ ७६ ॥

ब्रह्माण्डेऽस्मिन्क्षितिरतिवरा कीर्त्यतेऽस्यां च जम्बु-
द्वीपं चास्मिन्नधिकगुणवद्भारतं वर्षमेव ।
रामक्षेत्रं त्विह च परमो गूढदेशो गुहाख्यो
ग्रामश्चास्मिन् जयति जलधौ यत्र वाडेशदेवः ॥ ७७ ॥

॥ इति श्रीवाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
गुहागारग्रामवर्णनो नाम त्रयोदशः सर्गः ॥

— १४ —

अथात्रोनातिरिक्तासदुक्तिदोषापनुत्तये ।
स्तौमि वाडेश्वरं देवं देवेशं च गरामठम् ॥ १ ॥

अनाथबन्धुं करुणैकसिन्धुं
प्रसन्नमूर्ति सुपवित्रकीर्ति ।
गौरीकलत्रं कमनीयगात्रं
वाडेश्वरं नौमि जगन्निवासम् ॥ २ ॥

लसत्त्रिनेत्रं शुभपञ्चवक्त्रं
भुजङ्गभूषं लघुचित्रवेषं ।
भस्माङ्गरागं क्रतुशिष्टभागं
वाडेश्वरं नौमि जगन्निवासम् ॥ ३ ॥

चन्द्रावदातं गजवक्त्रतातं
चन्द्रार्द्धचूडं जगदेकनीडं ।
पवित्रगोत्रं वृषराजपत्रं वाडे० ॥ ४ ॥

आनन्दकन्दं हतवैरिवृन्दं
कृतान्तकालं नृकपालमालं ।
तीव्रप्रतापं प्रलयाग्निकोपं वाडे० ॥ ५ ॥

शिरोधिनीलं करिचर्मचेलं
पिनाकहेतिं भृतभूरिभूतिं ।
समस्तहेतुं प्रलयान्तकेतुं वाडे० ॥ ६ ॥

वाडेश्वरं नौमि हरं महेश्वरं
गङ्गाधरं पापहरं कृपाकरं ।
गौरीवरं शूलधरं हृतासुरं
विश्वम्भरं देववरं परात्परम् ॥ ७ ॥

इति वाडेशदेवस्य स्तोत्रं यः सर्वदा जपेत् ।
लब्ध्वा वाडेश्वरे भक्तिं भुक्तिमुक्ती लभेत सः ॥ ८ ॥

प्रपन्नपरिपालकं सकलरोगसन्दारकं
महानिरयतारकं समयगुप्तवृन्दारकं ।
विपद्गतिविमोचकं कलुषकोटिनिर्णेजकं
गरामठमुपास्महे हरिमनादिमीशं गुरुम् ॥ ९ ॥

समस्तसुरवन्दितं शिवविरिञ्चिसम्पूजितं
श्रुतिक्रतुभिरीडितं मुनिसमूहसम्प्रार्थितं ।
सरोजनिलयान्वितं सरसिजस्रगन्वाहितं
गरामठसमाह्वयं प्रतिभजेम नारायणम् ॥ १० ॥

महीधरधराधरं कनकसारपीताम्बरं
युगायतचतुःकरं दरगदारिकाब्जुड्धरं ।
अखण्डितकृपाकरं शरणदानदीक्षापरं
गरामठजगद्गुरुं शरणमाप्रपद्यामहे ॥ ११ ॥

श्रीमद्गरामठस्येदं पठेच्छ्लोकत्रयं हरेः ।
स सर्वबाधानिर्मुक्तः सर्वान्कामानवाप्नुयात् ॥ १२ ॥

अथापरमिदं स्तोत्रं कुर्वे साप्तविभक्तिकं ।
यत्र स्तुतो जगन्नाथकृष्णः सर्वविभक्तिभिः ॥ १३ ॥

कृष्णः स्वामी सोऽवतान्मां य एको
यत्किञ्चेदं दृश्यते श्रूयते वा ।
एकांशेन व्याप्य सर्वं समन्ता–
दोतःप्रोतश्चात्यतिष्ठद्वितस्ति ॥ १४ ॥

कृष्णं वन्दे देवमाद्यं यमाहुः
पूर्वं व्यक्तं निर्गुणं निर्विकारं ।
एकं ज्योतिर्ब्रह्मपूर्णं निरीहं
सत्वं शुद्धं सत्यमोङ्कारवाच्यम् ॥ १५ ॥

कृष्णेनाहं नाथवानस्मि तेन
विश्वस्थित्युत्पत्तिसंहारकर्त्रा ।
सर्वं विश्वं विश्वरूपेण येन
भूतं भव्यं सम्भृतं सम्भवच्च ॥ १६ ॥

कृष्णायास्तु प्रत्यहं मत्प्रणाम-
स्तस्मै नित्यं सर्वभूतानि यस्मै ।
भूतस्रष्ट्रे सर्वयज्ञैकभोक्त्रे
श्रेष्ठं प्रेष्ठं सद्बलिं प्रार्पयन्ति ॥ १७ ॥

कृष्णादन्यन्नास्ति मे चिन्तनीयं
वाचो यस्मात्संनिवृत्ताः सचित्ताः ।
अप्राप्य स्वाभाविकागाधबोधा
द्विष्वकूस्थान्नान्नैजमायाजवन्या ॥ १८ ॥

कृष्णस्याहं तस्य दासोऽस्मि यस्य
पादौ नाभिः कंक्रमाद्भूर्भुवः स्वः ।
वह्निर्वक्त्रं चित्तमिन्दुर्दृगर्कः
प्राणो वायुश्चैव मन्ये प्रतीकाः ॥ १९ ॥

कृष्णे तस्मिन्नस्तु मे चित्तवृत्ति-
र्नित्यं नित्ये सत्यसत्ये विभूम्नि
यस्मिन्नेतत्संविचैति स्वधाम्नि
कौ वीजानि ह्यापयान्तीच यान्ति ॥ २० ॥

कृष्ण श्रीमान्पाहि मां पुण्यकीर्त्ते
स्वामिन्नास्सेऽनामरूपोऽपि सत्यं ।
लोकस्यात्मा नामरूपाणि धत्से
क्षेमाय त्वं केवलानन्दमात्रः ॥ २१ ॥

कृष्णो वृष्णिवरः सदा विजयते कृष्णं भजे केवलं
कृष्णेनास्म्यहमीश्वरेण परवान्कृष्णाय तुभ्यं नमः ।
कृष्णादन्यदिहास्ति मे न शरणं कृष्णस्य दासोऽस्म्यहं
कृष्णे मे कृतनिश्चयास्तु धिषणा हे कृष्ण मां पालय ॥ २२ ॥

यः संव्याप्येदमास्ते यमिदमिति विदुर्येन चित्तं गृहीतं
यस्मै चेदं प्रदत्ते ध्रुवमिदमभवत्सर्वमादौ च यस्मात् ।
यस्येदं पालनीयं लयसमय इदं लीयते चैव यस्मिन्
सत्वं कृष्णानुकम्पिन्मयि वरद दयां दीनबन्धो विधेहि ॥ २३ ॥

वंशेऽभूत्कौशिकस्यागणितगुणगणो वेदतत्त्वावबोधी
काशीनाथाभिधानः सकलबुधवरः श्रीगुहग्रामवासी ।
तत्पुत्रात्पुण्यगोत्रात्समजनि सुकृती श्रीमहादेवसंज्ञो
विद्वान्पित्राख्ययोक्तो द्विजजनपरमो भूद्धरिर्नाम तस्मात् ॥ २४ ॥

हरेर्महादेव इति प्रसिद्धः
सुतः सतामग्रसरो वदान्यः ।
इयाज यः कोटिदलैस्तुलस्या
विष्णुं शिवं रुद्रजपाध्वरैश्च ॥ २५ ॥

यस्यान्नदानकीर्तिर्लोकैरुद्ग्राह्यते ऽद्यापि ।
जगती विततप्रतिमामोमानाथाङ्घ्रिपद्मसेवी यः ॥ २६ ॥

तद्भुवैतद्गुहग्रामे शश्वन्निवसता सता ।
विश्वनाथद्विजेनेदं काव्यं रचितमाञ्चितम् ॥ २७ ॥

रन्ध्रबाणतिथिसंमिताब्दके
शालिवाहनशके गते सति ।
ग्रन्थपूर्तिसुकृतं कृतं चिरं
चक्रपाणि चरणे समर्पितम् ॥ २८ ॥

इति श्री वाडेश्वरोदये महाकाव्ये विश्वनाथकृतौ
देवस्तवनो नाम चतुर्दशः सर्गः ॥

॥ राम ॥ कृष्ण ॥ शुभमस्तु लेखकपाठकयोः ॥

॥ श्रीगणेशाय नमः ॥

खगाश्वबाणभूयुक्ते शके विजयवत्सरे ।
वाडेश्वरोदयं काव्यं द्विजो रामो व्यलीलिखत् ॥ १ ॥

श्रीकृष्णो जयतितराम् ॥ रामाय तस्मै नमः ॥ कृष्ण रामकृष्ण ।